R
S
V
L
1000
61
178/ XIII
1000

1000

Registered No M 2300.

Book XXXIV || श्रीः || Nos. 1-2

# उद्यान पत्रिका

A 33

नाम

## ॥ संस्कृतमासपत्रिका ॥

:o:

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३४] कलि ५०६१ प्लव – कन्या–तुले [सं १–२

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

September & October 1961.

In case you have not received the previous number please inform the Editor or Publisher immediately.

पत्रिकामूल्यं निश्शेषं प्रेष्य उपकर्तव्यम् ।

**Kindly help the poor journal by sending the arrears of your subcription**

For the rate of subscription please see inside.

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासञ्चिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 श्री त्यागराजनवरत्नमालिका ।
2 दशावतारस्तोत्रम् ।
3 सत्यम्-4 ।
4 रामराज्यम् ।
5 लोकवृत्तम् ।
6 वसुमान्-7 ।
7 श्री लक्ष्मीपञ्चाशत् ।
8 रघुवंशः ।
9 प्रकृतिभेदः ।

The Githartha Sangraha—33-36.

1000

॥ श्रीः ॥

# ॥ अथ श्री त्यागराजनवरत्नमालिका ॥

नैतन्न दुर्ग्रहदशाविनिमीलनं मे
यत् त्यागराजमविचिन्त्य कुलावलम्बम् ।
कृच्छ्रप्रसाद्यमनुदारमपूर्वहृद्यं
तं तं सुधाशनमसेवत हन्त चेतः ॥ १ ॥

कालस्य किं नु परिवृत्तिरियं मनोज्ञा
खिन्नस्य किं नु परितो मतिरीदृशी मे ।
अव्याजभूतभवदीयकृपाविशेष-
सञ्चोदनानि किमु मां प्रतिबोधयन्ति ॥ २ ॥

मन्तुं प्रकल्प्य किमपि श्रितरक्षणेषु
वैमुख्यमेति विबुधस्त्वसमर्थ एव ।
मन्तुः कियानिति स कीदृश इत्यपेक्षा-
शून्या दयापर तवैव वदान्यवृत्तिः ॥ ३ ॥

सङ्कीर्तितेषु निखिलामरनामधेये-
ष्वत्वत्समाश्रयपरो महदद्भुतं नः ।
अत्यागशीलमनुसृत्य किमस्ति कृत्य-
मावेधसः क इह नार्थिपदाभिधेयः ॥ ४ ॥

सर्वेश्वरं स्वयमसक्तमुदारशीलं
त्वामर्थिनां विजहतामिह भिक्षुबुद्ध्या ।
भोगातुरः सुर उपास्य इति प्रतीति-
र्जाता कुतो यदि न भाग्यविपर्ययेण ॥ ५ ॥

रत्नाकरो न वितरत्यविलोड्यमान-
श्चौरः श्रियःपतिरहो हरते न दद्यात् ।
ऋद्धेषु संग्रहपरेषु कपालमात्र-
तुष्टो विभूतिमखिलां त्यजसि प्रभो त्वम् ॥ ६ ॥

श्रेयो विधातुमपरत्र निरस्य पापं
याच्ञाश्च पूरयितुमत्र यथाभिलाषम् ।
आचापवर्गमुपपादयितुं प्रसादं
कं त्यागराज भवतः परमर्थयिष्ये ॥ ७ ॥

भिक्षुः पुरातन इति प्रथितोऽसि नाथ
नाम्नैव मोहयसि किं वितथप्रथेन ।
दृष्टं बहुत्र तव पादजुषां प्रवादे-
ष्वस्तीति वागपि निराश्रयणा प्रपञ्चे ॥ ८ ॥

श्रुत्वा चिराय तव सुन्दरपक्षपातं
राजेति सूक्तिकलिकामुपदां विधाय ।
प्रत्याशयाऽनुपतितोऽसि विभो प्रसीद
कः स्वं न सुन्दरमवैति न तादृशोऽपि ॥ ९ ॥

त्यागव्रते निरवधौ तव दीक्षितस्य
सर्वार्थदुर्विधजनाधिगमो हि लाभः ।
तत् त्यागराज समुपस्थितमात्मनोऽर्हं
मामर्थिराजमुपलालय सर्वकामैः ॥ १० ॥

॥ इति श्रीमन्महालिङ्गकविविरचिता श्रीत्यागराजनवरत्नमालिका समाप्ता ॥

॥ शुभमस्तु ॥

# ॥ अथ दशावतारस्तोत्रम् ॥

प्रलयापदि निर्मग्नवेदजालोद्दिधीर्षया ।
धृतमीनशरीराय नमो वेदार्थमर्मणे ॥ १ ॥

देवानाममृतप्राप्तिहेतोराघूर्णतेऽर्णवे ।
पृष्टास्थिधृतमन्थाय नमः कूर्माय पर्विणे ॥ २ ॥

अम्भसोऽभ्यन्तराद्दंष्ट्रालग्नकर्दमविभ्रमाम् ।
धरामुद्वहते तस्मै नमः कारणपोत्रिणे ॥ ३ ॥

सदनस्तम्भनिर्भातनरकेसरिमूर्तये ।
नमो दैत्यद्विषे तस्मै प्रह्लादाह्लादकारिणे ॥ ४ ॥

बलिच्छलनवैलक्ष्यवामनीभूतवर्ष्मणे ।
विक्रमाहरणानन्दविवृद्धवपुषे नमः ॥ ५ ॥

क्षत्रमात्रविरामाय वारानप्येकविंशतिम् ।
नमो भार्गवरामाय स्वयं स्वधितिधारिणे ॥ ६ ॥

नमो धरणिजामात्रे पुष्पकेणाभ्रलङ्घिने ।
मारुतिस्वामिने बद्धपाथसे ज्वलनौजसे ॥ ७ ॥

नमो हालामदोद्रेकप्रस्खलद्गद्गदोक्तये ।
हलावर्जितकालिन्दीपूराय बललक्ष्मणे ॥ ८ ॥

बाललीलायितारिष्टमुखदानवहानये ।
वेणुनादविनोदाय वल्लवीप्रेयसे नमः ॥ ९ ॥

म्लेच्छविच्छेदिताशेषसन्मार्गोद्धारकारवे ।
कृपाणीकेलिनर्मात्रे भवित्रे कल्कये नमः ॥ १० ॥

भुवो भूयोऽवतारर्द्धिसंहृतागन्तुकैनसे ।
अकुण्ठमहसे तस्मै वैकुण्ठाय नमो नमः ॥ ११ ॥

दशावतारनेपथ्यहेलाहेवाकिनो हरेः ।
श्रीमहालिङ्गरचितं स्तोत्रं निःश्रेयसोत्तरम् ॥ १२ ॥

॥ इति श्रीमन्महालिङ्गकविविरचितं दशावतारस्तोत्रम् ॥

# ॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३४] कलि ५०६२ प्लव- कन्या-तुले [सं १-२

(1961-September-October)


## ॥ सत्यम् - 4 ॥

प्राक्तनीषु तिसृषु सञ्चिकासु सत्यस्य वैभवं प्रति किञ्चिदभाषामहि । तस्य सर्वस्य सारांशः अयं, यत् तस्य विप्लवे लोकयात्राः दुःस्थिता भवेदिति ।

यद्यप्यद्य प्रजानां सुखजीवनसम्पत्तये प्रयतमानाः राष्ट्रशासन-धुरन्धराः तत्तत्कार्यनिर्वर्तनाय बहुधा प्रयस्यन्ति, तथाऽपि जनानां आत्म-गुणसम्पत्तये किमपि कर्तुं न शक्नुवन्ति । प्रकृत्या शरीरिणां अमार्ग-गमने रुचिर्भवति । तन्निरोधनसामर्थ्यं यथा जायेत तथा तेषां शिक्षा देया । न च दीयते । ततस्ते स्वाभाविकेन अर्थकामप्रावण्येन अधर्मे निश्शङ्कं प्रवर्तन्ते ।

अद्य प्रधानकर्तव्यं प्रथमकर्तव्यं च जनानां धर्मपरतासम्पादनमेव । स कश्चिन्नास्ति लोके, यः अनृतभाषणं अधर्म इति न जानाति । अथापि ततो निवृत्तिः कस्यापि न भवति । सर्वो निस्सङ्कोचं अनृतं भाषते ।

लोकहितकामैः महद्भिः, विशेषतः राष्ट्रपरिपालनभरं वहद्भिश्च जनानां सत्यैकनिष्ठत्वसिद्धये तीव्र उद्यमः सद्यः कार्यः । अन्याय्यं स्वोद्देशं पूरयितुं अनृतमुच्यते । तेन लोकस्यैव महती हानिर्जायत इति तत्त्वस्या-ज्ञानात् एवं क्रियते । अस्मिन् विवेके सम्पन्ने भूयिष्ठा जनाः असत्यात् निवृत्ता भवेयुः । ज्ञात्वाऽपि ये ततो न निवर्तन्ते ते मूर्खाः । ते दण्ड्याः । तेषु सर्वैः अवज्ञा कर्तव्या । भूयिष्ठेषु सत्यपरेषु स्थितेषु अनृतवादरता अपि कतिपये स्वात्मनि परैः क्रियमाणया अवज्ञया निन्दया च क्रमेण चित्तपरिपाकं प्राप्य धर्मनिविष्टमतयो भवेयुः ।

अतो गृहेषु, आपणेषु, कार्यालयेषु, न्यायस्थलेषु, विद्याशालासु सर्वत्र अनृतस्य सर्वथा परिहारे सत्यमात्रावलम्बने च निष्ठा यथा जायेत तथा सर्वैः शक्यः सर्वः प्रयत्नः सद्यः कार्यः ।

अयमुद्देशः दुष्पूर इति कामं बहवो मन्यन्ताम् । तत्त्वं पुनरेतदेव । अनृतप्रसरो लोकस्य महतेऽनर्थाय । यावत्तन्निरोधं क्षेमो दुर्लभः । फलसङ्गरहिताः भगवति भरं निवेश्य यतेमहि । स ह्याह—

"कर्मण्येवाधिकारस्ते मा फलेषु कदाचन" इति

---

# रामराज्यम् ॥

(उत्तमस्य राज्यस्य उत्तमो राजा)

वि. वि. श्री.

## द्वितीयेऽङ्के द्वितीयं प्रेक्षणकम्

(अनुवृत्तम्)

---

(मन्थरा उत्थाय रामस्य पुरतः साञ्जलिबन्धा तिष्ठति)

रामः— (जनसङ्घं प्रति) सखायः! भवतां कृते अहं लज्जितोऽस्मि । अयोध्यावासिनो भवन्तः एवं धूर्तवृत्तमाचरन्ति! मारितकल्पा किल इयं भवद्भिः ।

प्रथमः पौरः— महाराज! जानासि केयमिति ?

रामः— आम् । जानामि इमाम् । सुष्ठु जानामि ।

द्वितीयः— प्रभो! इयं मन्थरा । साक्षात् पिशाची अवतीर्णा ।

तृतीयः— इयं सा, या कैकेय्या मतिं विषदूषितां चकार ।

चतुर्थः— मारयामास च तव पितरम् ।

पञ्चमः— विद्रावयामास च त्वां सीतां च वनाय ।

षष्ठः— किमियं दयायाः कणमप्यर्हति ?

रामः— आम्, अर्हति । मनुष्येषु न कश्चिदस्ति, स्त्री वा पुरुषो वा, यः तथा दुष्टः यथा दयां नार्हति ।

प्रथमः— (मन्थरां हस्ते ग्रहीतुमुद्यतः रामं प्रति) न, महाराज! अस्मिन् विषये न वयं तव विधेयाः। निश्चितमतयो वयं पितृवनं नीत्वा जीवन्तीमिमां दग्धुम्। तदप्यस्या विषये प्रीतिकार्यमेव भवेत्।

रामः— (तं उग्रं पश्यन्) अहमाज्ञापयामि त्वाम्। अपनय ते हस्तं तस्याः। मुञ्च ताम्। यदि यः कोऽपि तां स्पृशेत् स तीव्रं दण्डं लभेत। यद् रामो वदति तत् तस्य प्रजाभिरनुष्ठेयम्। रामराज्ये अस्त्ययं विधिः यस्य कस्यापि या काऽपि हिंसा येन केनापि न कर्तव्येति (मन्थरां प्रति) आर्ये मन्थरे! कथं भवती एषां धूर्तानां हस्ते पतिताऽभूत्?

मन्थरा— महाप्रभो! इमानि पञ्चदश हायनानि अहं विप्रकृष्टे केकयदेशे निलीना अभवम्। भरतेन अधिक्षिप्ता गर्हिता चाहं गुप्ता निष्क्रम्य स्वदेशं पलायिता। कतिपयेभ्यो दिनेभ्यः प्राक् भवान् सीता च अरण्यात् निवृत्तौ अभिषिक्तौ चेत्यश्रृणवम्। पूर्ववृत्तं सर्वं विस्मृतं स्यादित्यचिन्तयम्। अत्र आगत्य युष्मान् सर्वान् द्रष्टुं मम महत् कुतूहलमभूत्। अतोऽद्य सायं तमसि जाते वीथ्यां शिरः प्रासारयम्। कश्चिन्मां अद्राक्षीत्, आक्रोशच्च। जनाः संहताः सन्ताडनैः पादघातैश्च मृतप्रायां मामकार्षुः। भवता अनिवारितेषु तेषु इयता कालेन अहं मृता अभविष्यम्।

रामः— (जनसङ्घं प्रति) सुहृदः! सर्वमिदं असाधु। अत्यन्तमसाधु। हिंसाप्रवणं हस्तं अस्यां आहितवद्भिर्नैव भवितव्यं युष्माभिः। अस्य कृते उग्रं दण्डं यूयमर्हथ।

द्वितीयः पौरः— किं किम्! वयं दण्डमर्हामः इमां दुष्टामाभिचारिकीं जरठां दण्डेन योजयितुं प्रवृत्ताः?

रामः— नियच्छ वाचम्। अनभिज्ञस्त्वं धर्मस्य। पापमुद्भावयति पापम्। शुभमुद्भावयति शुभम्। इदानीं कृतस्य अपराधस्य कृते युष्मान् सर्वान् अहं दण्डितवान् भवेयम्। किन्तु मयि सीतायां च भक्त्या यूयं इदं अकार्ष्टेति मर्षयामि। महानेषोऽपराधः। तथापि संप्रति क्षमे। प्रियसुहृदः! इतःपरं युष्माभिरेवं कदापि न कर्तव्यम्।

तृतीयः पौरः— महाराज! किमयं धर्मः यत् साकेतवासिभिः सर्वैर्जनैः द्विष्टः पापिष्ठो जनः तज्जिघांसया फुरफुरायमाणाभ्यां अस्माकं हस्ताभ्यां विमोच्य परित्रायते?

# ॥ लोकवृत्तम् ॥

तिरुवारूर् (द्राविडनगरम्) कश्चित स्वभार्यां व्यापाद्य आत्मानं पालकेभ्यो निवेदयामास ।

विजयवाडा (आन्ध्रनगरम्) कश्चित् स्वभार्यां तदनु आत्मानं च व्यापादयामास । (26—10—61)

आद्यस्य मरणाद्भयं, न पालकेभ्यः, भविष्यतो दण्डाद्वा । द्वितीयस्य विपरीतमिदं—पालकेभ्यो दण्डाच्च भयं, न मरणात् । भार्यावधक्रौर्ये उभौ समौ ।

कल्कत्ता । विप्रोषिते पत्यौ काचन स्त्री स्ववासगृहे शय्यायां मृता दृष्टा । दुर्गन्धप्रसरशङ्कितैः प्रातिवेशिकैराहूताः पालकाः कवाटमुद्घाट्य अपश्यन् । (30—10—61) किमियमात्महत्या अथवा दुर्जनचेष्टितम् ? न ज्ञायते ।

धोल्पूर् । एतत्सन्निहिते 'बारी' ग्रामे विद्याशालामाणवकः कश्चित् द्वित्राणि दिनानि अदर्शनं गतः पश्चात् सारण्यां मृतो दृष्टः । तस्य शरीरे शस्त्रघातव्रणा अवर्तन्त (29—10—61)

उत्पथगामिनो हौरा—राञ्ची धूमशकटस्य निपातेन 51 मनुष्या मृताः । 12 तीव्राभिघाताः । 182 अल्पव्रणाः । (20—10—61) अस्या विपदः कारणं दुरात्मकृतं मार्गभेदनमिति वदन्ति समीक्षितवन्तो अधिकारिणः ।

मणिपुरप्रदेशे अपरा घोरा धूमशकटविपत् वृत्ता, यत्र विंशतिर्मृताः भूयांसो व्रणिताः । (29—10—61)

एवंविधानि अपचरितानि प्रजासु यथा न भवेयुः तथा संविधानं राष्ट्रपरिपालनस्य प्रथमं उद्देश्यं भवितुमर्हति । संस्कृतविद्यायाः सम्यक् प्रचारे सति इदं ज्ञायेत । तद्विरहात् अवश्यकर्तव्येषु उपेक्षा, अकर्तव्येषु तत्परता, विलम्ब्य कर्तव्येषु त्वरा, त्वरया कर्तव्येषु मान्द्यं इति सर्वमेतद् दृश्यते ।

अन्यत्र जलप्रवाहोपद्रवे महति स्थिते आन्ध्रान्तर्गते मण्डलविशेषे क्षामपीडा महती वर्तते । आधिदैविकी विपदियम् ।

# ॥ वसुमान्-7 ॥

ललितेति च कोमलेति च आख्यातायाः रत्नकान्तस्य वणिजः पुत्र्याः वसुमते दानं निरचीयत। विवाहसम्भाराः सम्भ्रियमाणा अवर्तन्त। बन्धूनामाह्वानाय मुद्रिता मुहूर्तपत्रिकाः रत्नकान्तः तेभ्यस्तेभ्यः प्रेषयन्नासीत्। तस्मिन्नवसरे वसुमन्तमाहूय स आह—"आर्य! अस्मिन् विवाहे भवद्बान्धवा अपि हि सन्निधातुमर्हन्ति। तेषां नामानि धामानि च मे ज्ञापय। तेभ्यः शुभमुहूर्तपत्रिकां प्रेषयामि"।

"न मे कश्चन बन्धुरस्ति य इह आगमिष्यति" इति वसुमान् प्रत्यभाषत। परन्तु अनुपदं स्वमातुलं सस्मार। सपदि तस्य मनसि महान् विमर्शः समजनि— तस्य आह्वानमुचितं न वेति। गर्धनः, निर्घृणः, निर्दाक्षिण्यः, हिंसकः। आत्मानं एकवस्त्रं निष्कासितवान्। किं तस्य आह्वानेन, इत्यमन्यत। पुनः "यादृशतादृशः स भवतु। साक्षान्मातुलः। अनाथमात्मानं आनीय वर्धितवान्। स कथं नाह्वातव्यः", इत्यमन्यत। एकतः तद्दोषचिन्ता एनं प्रतिरुरोध। अपरतः तस्य सकाशात् स्वेन प्राप्तस्य उपकारस्य स्मृतिः प्रवर्तयामास। एवं चिरं द्विमतिर्बभूव। अन्तत एवं निश्चयमकरोत्— "तस्य गृहान्निर्गमात् प्रभृति तत्सम्बन्धिनी वार्ता सकृदपि न श्रुता। तस्य वा तदीयानां वा इदानीं का स्थितिः, नाहं जानामि। मां प्रति अधुनाऽपि स किं रुषित एव अथवा शान्तरोषः? आह्वानं प्रेषितं प्रतिगृह्य आगमिष्यति न वा? किमपि न ज्ञायते। अथापि किमिति मया द्वेषिणा भाव्यम्? दोषेषु जात्यन्धो भूत्वा उपकारमात्रं स्मरन् सज्जनोचितां वृत्तिं अह-

मवलम्बिष्ये । आह्वानं प्रेषयिष्यामि । प्रसन्नमनाः सन् उपाजिगमिषति चेत् आगच्छतु । सम्बन्धी सन् विवाहमण्टपे प्रथमताम्बूलं गृह्णातु । वरपक्षीयो यः कोऽपि जनो नास्तीति वैकल्यं न भविष्यति । अथानुवृत्तरोषः नागच्छति कामं नागच्छतु । का हानिर्भविष्यति ? कथमपि पत्रिकाप्रेषणमेव समीचीनः कल्पः” इति ।

वसुमतः मातुलगृहात् निष्क्रमणात् प्रभृति तत्र कुटुम्बस्थितिः न तथा शोभना । तदीयया निष्ठुरया वृत्त्या उद्विग्ना जनाः तेन सह सर्वं व्यवहारं संस्थापयामासुः । प्रायो भाषणमपि तत्यजुः । तेन हेतुना वित्तागमः कालक्रमेण शून्यो बभूव ।

वयः प्राप्तवत्याः पुत्र्याः परिणयाय यत्नादन्विष्य आनीता वराः ग्रामवासिनामुपजापेन भिन्नमतयः किमप्यनुक्त्वा तस्याविदितमेव प्रत्यगच्छन् । एवं वरेषु आगत्यागत्य प्रतिगच्छत्सु सन्सु तस्य पुत्री कस्यचन धूर्तस्य वञ्चनाजाले पतिता तेन असकृत् समागच्छन्ती न केवलं स्वस्य स्वकुलस्य च अल्पेतरां अपख्यातिं आनिनाय अपि तु तेन अपेक्षितं विपुलं धनं मातापित्रोरविदितं तदा तदा नीत्वा ददती बहुलस्यार्थस्य नाशमपि चकार ।

पुत्रोऽपि जडधीः विद्याविमुखः कर्तव्येषु कर्मसु अलसः स्वच्छन्दं चरन् दुर्जनैः सङ्गतः वृथा वित्तव्ययकर आसीत् ।

आधिभिः सह व्याधिभिरपि पीडितो वीरबलः चिकित्साहेतोः भिषग्भ्यः बहुवित्तं दत्वाऽपि अलब्धस्वास्थ्यः अखिद्यत । तस्मिन् भवने लक्ष्मीविहारकालः अवसानमगात्, तदग्रजा विलासकाल उपस्थितः, इत्यभात् । ईदृशेन कुटुम्बदशाविपरिणामेन अतिमात्रविषण्णा तस्य गृहिणी शुगिव मूर्तिमती ददृशे ।

लेखवाहः वसुमतो विवाहपत्रिकामानीय ददौ। पुत्रः तामादाय "वसुमतः किल विवाहः" इत्युक्त्वा पितुरग्रे क्षिप्त्वा अपागच्छत्। "तात! वाचय रे वाचिकं" इति पित्रा सानुनयमुक्तोऽपि तां वाचं कर्णे अकुर्वन् बहिरगच्छत्। वीरबलः उत्थायोपविश्य शयनस्थ एव यष्ट्या पत्रिकां सन्निकर्षमाकृष्य, श्रमेण अवनम्य, हस्तं प्रसार्य, तामादाय पठित्वा विषयं बुबुधे। तदा तत्र आगतायै गृहिण्यै च निवेदयामास। क्षणं दम्पती तूष्णीमवर्तेताम्। ततः पतिः पत्नीमुवाच— "पश्य अयोग्यवटोर्धाष्ट्यम्। निर्लज्जः मुहूर्तपत्रिकां मह्यं प्रेषयति। अपदार्थः, दुर्जातः, दरिद्रशुनकः। विवहन् भवतु अथवा ध्वंसताम्। कस्य किं तेन? किमिति मह्यमाह्वानं प्रेषयति?"। आविष्ट इव उच्चैरेवं बभाषे। अस्वास्थ्यकृतं दौर्बल्यं तत्कालं तस्य शरीरं अजहादिव।

तं पत्नी प्रत्युवाच— "अलमनेन अस्थाने सम्भ्रमेण। शरीरस्य अवसादमेष वर्धयेत्। प्रशान्तमना भवितुमर्हत्यार्यपुत्रः। न खल्वन्यो यः कोऽपि अस्माकं वसुमान्। साक्षाद्भागिनेयः। जातमात्रः इहानीय वर्धितः। विवेकी, समर्थः, अनलसः, बन्धुप्रियः। स चेदनिष्कासितः गृहे अवर्तिष्यत अस्मत्पुत्रः पुत्री च नूनं तेन आहितविनयौ शोभनवृत्तौ अभविष्यताम्। आपत्सु अपाश्रयः सोऽभविष्यत्। अनाथा हि वयमद्य वर्तामहे। अविधेयौ स्वैरवृत्तौ पुत्रौ कुलस्य अकीर्तिमाहरतः। आवयोः क्लेशं न जानीतः, न गणयतः। आर्यपुत्रः रोगार्तः। ममापि शारीरं बलं क्रमेण हीयते मनोऽपि आधिभिरवसीदति। का नामास्माकं सम्प्रति गतिः। वित्तमपि प्रायो नष्टम्। इयं स्थितिरनुवर्तेत चेत् कतिपयैर्मासैः प्राणधारणाय भिक्षापात्रं ग्राह्यं भविष्यति।" एवमुक्त्वा रोदितुमारभत।

# ॥ श्री लक्ष्मीपञ्चाशत् ॥

विद्याभूषणं, चिलुक्कूर् मा॰ वेङ्कटराघवाचार्यः, शिरोमणिः।

न त्वां याचे पदवीं ब्राह्मीमैन्द्रीं न चापि कौबेरीम्।
वाचो प्राचीनानां याचे दूरे स्थितं पदाब्जं ते ॥ १४ ॥

दापय रमे धनौघं भागवताराधनोपयुक्तं मे।
बुद्धिं च तादृशीं त्वं नो चेद्वित्तेशताञ्च नेप्सेऽहम् ॥ १५ ॥

कृत्वाप्यपराधशतं तव राक्षस्यः प्रपेदिरे शर्म।
इति मत्वा क्रियमाणानपचारान्मे क्षमस्व देवि त्वम् ॥ १६ ॥

त्रातुं मुनीन्द्रसङ्घान् रावणकरिणश्च हन्तुमालोच्य।
मृगमृगयाव्याजात् किं राघवसिंहोऽजहादरण्ये त्वाम् ॥ १७ ॥

शेषाचलाद्रिवासी परिणीय त्वामवाप पारम्यम्।
लक्ष्मीं त्वत्तोप्युच्चैरित्याद्यचूर्यतो गुरूत्तंसाः ॥ १८ ॥

मामत्याक्षीः कमले न लभेथास्त्वन्तु मादृशं रक्ष्यम्।
अन्यद्वस्तु नितान्तं किल्बिषकारी यतो न मत्तोऽन्यः ॥ १९ ॥

कण्ठे धृतां भवत्या मल्लीमाला मताल्लिकां फुल्लाम्।
विष्णुः करोति कण्ठे धन्यो यस्ते पतिः श्रियःकान्तः ॥ २० ॥

नृहरेर्वामाङ्कगते त्वदलकराजत्प्रफुल्लकुसुमानि।
जिघ्रत्यतः पतिस्ते नित्यं प्रोक्तस्स सर्वगन्ध इति ॥ २१ ॥

सनकादियोगिनस्त्वां कनकाभरणैर्विभूषिते देवि।
तपसाराध्यदयायास्तव पात्रं नूतनं बभूवुस्ते ॥ २२ ॥

॥ श्रीः ॥

# ॥ रघुवंशः ॥

वेदप्रभृतीनि बहूनि शास्त्राणि चिरन्तनानि सन्ति। तेषां सर्वेषां इदमेकमुद्देश्यं यत् सुखजीवनहेतुभूतं सर्वश्रेयोनिदानं कार्याकार्यविवेकं सर्वे जना लभन्तामिति। शास्त्राणां कठिनत्वात् सर्वेषां सुखबोधः तेभ्यो न भवतीति पश्यद्भिः कारुणिकैः ललितया रसपेशलया च शैलया सर्वजनसाधारण्येन शास्त्रसारार्थबोधं सुप्रापं कर्तुं काव्यपद्धतिः उन्मीलिताऽभवत्।

व्यासवाल्मीकिभ्यां अर्वाचीनेषु कविषु अन्यो यः कोऽपि कविः न तथा महान् यथा कालिदासः। तत्र हेतुरयमेव यत् काव्यप्रवृत्तिप्रयोजनस्य यथा तदीयानि काव्यानि समग्रसिद्धिकारीणि, न तथाऽन्यदीयानि। तदीयेष्वपि काव्येषु रघुवंशो विशिष्यतेतमाम्। अत इदानीं तद्रसास्वादे यत्नः क्रियते।

## प्रथमः सर्गः

वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ॥

वन्दे अभिवादये स्तुवे वा। कौ? पार्वतीपरमेश्वरौ पार्वतीं च परमेश्वरं च। कौ तौ? पितरौ मातरं च पितरं च। कस्य पितरौ? जगतः कृत्स्नस्य लोकस्य, न तु कस्यचिदेकस्य अथवा द्वित्राणामधिकानां वा पुत्राणामेव। कथम्भूतौ? सम्पृक्तौ संश्लिष्टौ। काविव? वागर्थाविव। यथा वाक् च अर्थश्च परस्परं संश्लिष्टौ तथा। शब्दे श्रुते तदर्थ उपस्थितो भवति। अर्थे दृष्टे तद्वाचकः शब्द उपस्थितो भवति। शब्दार्थौ नित्यौ। तत्सम्बन्धोऽपि नित्यः। अतः इमाविव नित्यसम्बद्धाविति भावः।

वन्दनं कस्मै फलाय। वागर्थप्रतिपत्तये। शब्दार्थोभयमयं काव्यम्। रसानुरूपस्य शब्दस्यार्थस्य च प्रतिभानं कवीनामपेक्षितम्। एतत्सिद्धिमुद्दिश्य वन्दनम्।

कालिदासस्य प्रथमा कृतिः रघुवंशः। तत इह ईश्वरदम्पतिवन्दनरूपस्य मङ्गलस्य कण्ठतो निबन्धनम्।

यद्यप्यधीतसर्वशास्त्रः विदितलोकवृत्तान्तश्च कविः ग्रन्थं निर्मातुं प्रवर्तते तथाऽपि ईश्वरानुग्रहं विना स्वप्रयत्नमात्रावलम्बेन क्रियमाणं किमपि न रमणीयं भवेदिति तत्त्वं विदन् तमादौ लिप्सते। आस्तिकाग्रेसरः खल्वयं महाकविः।

दिव्यदम्पती अभिमतार्थदानसमर्थौ। पितरौ बालानां वागर्थव्युत्पादने उचितौ, अधिकारिणौ। न पितैव केवलं, नापि मातैव केवलं, अपितु उभावपि शिशोर्भाषाव्युत्पत्तिदायिनौ। अतोऽत्र उभयोर्वन्दनम्, न त्वेकस्यैव।

मनुष्यरूपौ पितरौ अल्पव्युत्पत्तिप्रदौ। कवेः पुनः प्रायः सर्वज्ञत्वमपेक्षितम्। तत् जगत्कारणत्वेन यौ सर्वज्ञौ तदनुग्रहैकलभ्यम्। अतो जगत्पितृत्वकीर्तनम्।

वर्तमानसर्वज्ञत्वमात्रं न पर्याप्तम्। त्रैकालिकसर्वज्ञत्वमभिलष्यते। अतः वागर्थाविव सम्पृक्ताविति नित्यत्वमनुसन्धीयते। नित्यौ हि तौ त्रैकालिकसर्वज्ञौ। तौ प्रसन्नौ तथात्वमनुग्रहीष्यतः।

नित्यत्वस्फूर्तये 'अनादिमध्यनिधनौ' इत्येतावदलम्। सम्पर्कोऽधिक उपात्तः। तत्रायमभिसन्धिः। द्वावीश्वराविति न द्वैराज्यप्रसङ्गः। न परं वपुषा, भावेनापि संश्लिष्टौ हि इमौ। अनयोर्मतिभेदः कदापि न भवति। तस्मात् तयोर्द्वित्वेऽपि लोकस्य ऐकराज्यस्य न भङ्ग इति।

सम्पृक्ताविति पदे अक्षराणां मिथः सम्पृक्तता अवधेया। संश्लिष्टौ संयुक्तौ सम्बद्धौ इत्यादिकमपेक्ष्य अस्य पदस्यास्ति महान् विशेषः। अत एव

प्रभार्काविव सम्पृक्तौ भवभीतिनिवृत्तये।
संरक्षितारौ जगतां लक्ष्मीनारायणौ भजे॥

इति दिव्यसूरिचरितकारो गरुडवाहनपण्डितः पदान्तराणि सर्वाणि परित्यजन्नपि सम्पृक्तपदमात्रं रक्षति।

वागर्थाविवेत्युपमयैव उपक्रमते। कालिदासस्य हि स्वभूतेयम्। शब्दालङ्कारोऽप्यत्र स्फुटः।

# प्रकृतिभेदः

गृहिणी— भद्रे, कच्चित् शिशुमाशयिष्यसि ? कच्चिदन्नं किञ्चिद् वण्टयानि ?

कमला— साधु अम्ब। किञ्चिद् वण्टय। आशयामि। एहि तात। मामी अन्नं ददाति। भुङ्क्ष्व।

गृहिणी— इदं पत्रम्। इदमन्नम्। अयं सूपः। पिनद्धि।

कमला— कच्चिद् घृतं स्वल्पमस्ति, मामि।

गृहिणी— कुतः स्वल्पम् ? प्राज्यं ददामि। पश्य, इदं घृतम्।

कमला— (अन्नं पिष्ट्वा) एहि वत्स। घृतसिक्तं सुपिष्टमिदं अन्नं भुङ्क्ष्व। आपणं गमिष्यामि। त्वामपि नेष्यामि। एहि। भुङ्क्ष्व। कथमरे नागच्छसि! जडस्त्वम्। पश्य सर्वं शुने क्षेप्स्यामि। (गृहिणीं प्रति) कच्चिदद्य शाकानि पक्वानि, मामि।

गृहिणी— आः, बहूनि पक्वानि। तान्यपि वण्डयामि। आशय आयुष्मन्तम्। इयं पटोली। इदं वार्ताकम्। इयं कदली। इयं भिण्डी ....।

कमला— जात, पश्य कति शाकानि। एहि भुङ्क्ष्व। अतिमधुरः मामी-पाकः। एहि। धावन्नेहि। त्वरया गन्तव्यं आपणं प्रति। अन्यथा त्वां इहैव विहाय गता स्याम्।

शिशुः— ऊहूम्

कमला— अत्यन्तं जडस्त्वम्। बहूनि स्वादूनि भक्ष्याणि दास्यति मामी।

गृहिणी— इयं ददामि। अयं अतिरसः। इयं गुडशष्कुली। इयं पोली। अयं लवलड्डुः। अयं गुञ्जालड्डुः ....।

कमला— पश्यसि तात भक्ष्याणि, हहा! कियत्स्वादूनि, कियन्ति! एहि भक्षय।

शिशुः—ऊहूँ।

कमला— अन्ततः पायसं वा पिब।

[ गृहिणी पायसं परिवेषयति। तदप्यनिच्छन्तं शिशुमाकृष्य कमला स्वहस्तेन तदादाय बलात्प्राशयति। शिशुः फूत्कारेण तद् वमित्वा परितः उच्छिष्टं करोति। वामहस्तेन तं लघु ताडयित्वा कमला हस्ताभ्यां सर्वमन्नमादाय वीथ्यां क्षेप्तुं गच्छति। ]

तत्रोपविष्टा सर्वं दृष्टवती विमला "पश्य मामि, कथं स्त्रियो भवन्ति। कियतो वस्तुनो नाशः। बुभुक्षायां सत्यां हि शिशुर्भुञ्जीत। तत् किमेषा न जानाति। अन्नं घृतं सूपः शाकानि भक्ष्याणि पायसम्, सर्वं उपर्युपरि पृष्ट्वा आनाय्य वृथा कृतवती। विनोद इव आसामयम्। धिगिदमासां अतिवात्सल्यं शिशुषु!"

गृहिणी— (सस्मितं) त्वं विवेकिनी। किं सर्वास्त्वादृश्यो भवन्ति?

विमला— न तथा, मामि। किमत्र महान् विवेकोऽपेक्षितः? वस्तूनां वृथा विनाशो न कार्य इति ज्ञातुं सामान्यबुद्धिः किं न पर्याप्ता?

(c) It may be seen that whatever may be the degree or level of the soul-experience achieved as the result of the *yoga*, the *yogin* comprehends the soul, in respect of its fundamental characteristics, as the same as all the other souls including the Supreme one, realising that all differences belong to the forms alone and they could never touch the souls. Arjuna feared that such a *yoga, i. e.*, the soul-experience, which comprehends the absolute sameness of all the souls was impossible to attain since the mind being unsteady and ever accustomed to see differences in things could not be controlled so as to concentrate on the soul and visualise its sameness with other souls; and he told Krishna of this. Arjuna's idea was that Krishna should teach him the means of controlling the mind so as to be able to attain the *yoga*. Replying to him Krishna said that there is no doubt that it is difficult to control the mind but it can be controlled through *abhyasa* and *vairagya*. *Abhyasa* here means inclination towards the soul developed as the result of constant thoughts of its attractive good qualities, such as eternity, knowledge-ness, bliss-ness, unsusceptibility to *karma*, purity or stainless-ness and others; and of complete detachment from and absolute disinterestedness in all things other than the soul. It has been already said that *karma-yoga* is the means to attain self-realisation, *i. e.*, the soul-experience, (*atma-sakshatkara*). This amounts to saying that mind purified by *karma-yoga* brings about the soul-experience, and this implies that mind is brought under control through *karma-yoga*. What is now said is that there are two ancillaries to it, namely *abhyasa* and *vairagya*.

(d) From the description given above of the soul-experience it may be seen that it is such that he who comes to know of it would never fail to feel at once a

thirst for it, it being so attractive and so interesting. It is but natural that such a person tries to learn the means of achieving it and then begins to practise it, though he may not be quite fit for it. When, however, he finds that the difficulties that attend the actual practice of the means, the *yoga*, are too great to be overcome by him he cannot help abandoning it, though reluctantly. After hearing Krishna's reply as shown above Arjuna thought of such a man and wanted to know what his fate would be. The non-yogins, *i. e.*, persons ignorant of *yoga*, perform *karmas*, actions, with a view to achieve and enjoy the results they can yield; and the *yogins* practise the *yoga* and enjoy its fruits —the soul experience and liberation (freedom from bondage). But what about those that take to *yoga* but fail in it. They are neither non-*yogins*, because they have no idea of enjoying the ordinary fruits of *karmas*, nor *yogins*, because they could not successfully practise the *yoga* and have abandoned it. What will happen to them after death ? Would it be that such a one does not perish being neither the one, nor the other ? Arjuna wanted to know this and he thought that this is a question, too big and too subtle to be answered by anybody else than Krishna, and so he put the question to Him. Removing this fear and doubt of Arjuna and speaking to him tenderly and lovingly, Krishna said, **'Arjuna, no; he will never perish. No good deed done will lead to ruin.** A *yoga-bhrashta*, one that has slipped from *yoga*, will go to the same world where the virtuous go and after remaining there for a long time will be born in the house of those that are pure and wealthy or in a family of *yogins* themselves. There he takes up the *yoga* begun in the previous birth and completes it and reaps its fruits." Thus even a very small attempt to practise *yoga*, even a desire to know *yoga*, will never go in vain. Such is the

greatness and value of *yoga.*[1] Thus saying Krishna advised Arjuna to become a *yogin.*

(*e*) The subject-matter of the first *shatka*—the first six chapters—namely the *karma* and *gnana yogas* resulting in the soul experience has been thus fully dealt with. Here the sixth chapter has to close. But with a view to keep up the continuity of the discourse Sri Krishna introduces here itself the subject-matter of the middle shatka, the next six chapters, which is *bhakti-yoga*, by way of telling Arjuna that " by far greater than the *yogins* and all others mentioned before, is he, the object of whose staunch and deep devotion is I Myself." This gives an idea to Arjuna of what Krishna is going to speak about next.

7. (*a*) It has been said that a *yogin* is superior to all *non-yogins*, whether they be *Tapasvins*, penance-doers, or *Gnanins*, knowers, or *Karmins*, doers of action, and that superior to even all other *yogins* is that *yogin* who is devoted to Krishna, in other words, whose *yoga* is directed solely and devoutly and lovingly to Krishna—*sraddavan bhajate yo mam sa me yuktatamo mataha* Krishna—is *Paramatman*, the Supreme *Brahman*, the Highest Truth. Therefore the *yogin* whose *yoga* has Krishna as its object is the greatest among the *yogins*. That yogin is greater than all the other yogins, because the *yoga* he practises is greater than the *yogas* practised by others. The *yoga* practised by that one is greater than the *yogas* practised by the others because it is concerned with an object which is greater than those with which the *yogas* practised by others are con-

1 The YOGIN, the practiser of this YOGA; who does action, KARMA, renouncing all its fruits and who has no interest whatsoever in any thing but the soul is by far superior to all others, whether they are TAPASVINS (penance-doers) or GNANINS, knowers of prana or such inferior things or KARMINS, doers of ordinary actions. VI 46.

# UDYANA PATRIKA.


Annual Subscription: Rs. Three only.

Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण सार्कं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.

TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,

*Proprietor,* The Srinivasa Press,

Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1 भयहरणगोपालविंशतिः ।

2 संस्कृतम् ।

3 रामराज्यम् ।

4 कूटयुक्तिः ।

5 वसुमान्-8

6 रघुवंशः ।

7 पुस्तकपरामर्शः ।

8 प्रकृतिभेदः ।

9 श्री लक्ष्मीपञ्चाशत् ।

10 श्री गीतार्थदीपः ३२९-३३२.

TIRUPATI



# ॥ अथ भयहरणगोपालविंशतिः ॥

छलपरिचरत्कंसप्रेष्यासुरीविषदूषित-
स्तनमुखपयःपानव्याजप्रचूषितजीवित ।
विषमहृदयस्त्रीसंसर्गाद्भवे मम दुस्तरं
भयमपनयन् दीनं गोपाल पालय मां विभो ॥ १ ॥

कुपितजननीव्यानद्धोलूखलप्रविघट्टन-
क्षततरुमिषप्रोद्यन्मार्गोपरोधियमार्जुन ।
पथि पथि निरोधोदग्राणां प्रमथ्य मदेनसां
निचयमचिराद्गोपाल पालय मां विभो ॥ २ ॥

प्रतिभयमहावात्यानूद्यद्रजःपरिवेषधृक्-
च्छकटदनुजक्षिप्रोन्माथप्रगल्भपदाम्बुज ।
शममुपनयन्सन्देहावर्तपांसुततीर्मम
प्रदिश धिषणां दीनं गोपाल पालय मां विभो ॥ ३ ॥

गृहमनु दधिक्षीराधीराधरामृतचौर्यधी-
परिचितजरद्गोपस्त्रैणप्रतारणसाहस ।
जगति विषमे नित्योद्विग्नं परार्थपरिग्रह-
प्रसभरुचिभिर्दीनं गोपाल पालय मां विभो ॥ ४ ॥

खुरपुटहतिक्षुण्णक्षोणीहठाक्रमणोत्पत-
द्वृषभकपटारिष्टक्रीडाविमर्दवलद्भुज ।
रणरणकक्रुद्धोरारिष्टप्रबन्धचिते भवे
प्रददभयं दीनं गोपाल पालय मां विभो ॥ ५ ॥

तरणितनयास्नानत्रासङ्करोल्बणकालिय-
प्रणमितशिरःपङ्क्तिप्रक्रान्तनृत्यमहोत्सव ।
सहृदयजनामोदव्यसङ्गदूषणतत्पर-
प्रखलचरितैर्दीनं गोपाल पालय मां विभो ॥ ६ ॥

निगडकलनात् काराबन्धात् तनूभवहिंसना-
न्निरवधिशुचोः पित्रोर्नैजावतारकृताभय ।
अविरलवहद्दुःखोत्पीडप्रपञ्चनिमज्जना-
दुपहतजनिं दीनं गोपाल पालय मां विभो ॥ ७ ॥

निशि घनतमस्युत्सृष्टालौकिकद्युतिदीपित-
त्वदपनयनश्रद्धानिष्क्रान्ततातपुरःपथ ।
भवभयमहामोहाटव्यामनाकलितेऽध्वनि
भ्रमणविवशं दीनं गोपाल पालय मां विभो ॥ ८ ॥

करधृतगिरिछत्रप्रत्यूढवासवचोदित-
प्रलयजलदत्रस्यद्गोगोपसंसदनामय ।
प्रभुपदजुषां दुःस्वातन्त्र्यादुपप्लुतजीवनौ-
पयिकमगतिं दीनं गोपाल पालय मां विभो ॥ ९ ॥

बदरफलविक्रेत्र्या हृत्वा फलान्यवहेलया
सखिभिरुपभुज्यान्यैर्हैमैः प्रपूरिततत्पिट ।
इह भुवि धनैकश्लाघिन्यामनायतिसम्भवात्
परिभवकृशं दीनं गोपाल पालय मां विभो ॥ १० ॥

किमपि नयनप्रीत्या स्तोकाङ्गरागनिवेदना-
हृतमदनिकाकुब्जत्वोन्मार्जनाहितसौष्ठव।
कथमपि चिरात् त्वय्यासक्तं मनः कुटिलं मम
स्थिरमृजुगुणं कुर्वन् गोपाल पालय मां विभो॥ ११ ॥

दुरितरुचिना पुत्रेणोपद्रुतस्य नियन्त्रणै-
र्यदुकुलपतेर्भूयो राज्याधिरोपणसुव्रत।
स्खलितचरणन्यासं दुर्दैवयन्त्रणयाऽभितो-
प्यशरणमये दीनं गोपाल पालय मां विभो॥ १२ ॥

विरहविषमावस्थोन्मादभ्रमप्रलयार्दित-
व्रजसुवदनासंकेतारब्धवेणुलतारव।
मुहुरसुखनिर्वाह्यप्रेयोवियोगविषानल-
ग्लपितमवनौ दीनं गोपाल पालय मां विभो॥ १३ ॥

स्थितखगमृगस्रोतस्याह्लादमुग्धवराननना-
निभृतवलये बृन्दारण्ये वलन्मुरलीरव।
विषपरुषिते संसारेऽस्मिन्नदोषभुवां मुदा-
मविदुषमये दीनं गोपाल पालय मां विभो॥ १४ ॥

त्वदहितविधानाशंसाऽऽस्फालितोरुभुजद्वय-
प्रसभरभसोद्भ्राम्यच्चाणूरचूर्णनलाघव।
व्यपगतनये व्यापादापद्रुते भुवने रिपून्
मम विदलयन् दीनं गोपाल पालय मां विभो॥ १५।

निरवधिरुजो भारार्ताया भुवः कुशलेप्सया
निखिलसुजनद्रोहोदग्रस्वमातुलमर्दन।
सततविधुरं स्वेष्टायोगादनिष्टसमागमा-
दयि करुणया दीनं गोपाल पालय मां विभो॥ १६॥

वननिलयनैर्वासश्चौर्यैर्विदग्धविलोभनैः
कपटचरितैस्तैस्तैरायासितव्रजयौवत।
द्रुतमपयतः कामान् मोहादनुद्रुतमन्वहं
श्रमभरपरिक्षीणं गोपाल पालय मां विभो॥ १७॥

प्रणयकलहक्षुभ्यद्राधाधरस्फुरणक्षणे
विवशमवपत्याङ्घ्र्योः प्रक्रान्तसान्त्वनसाहस।
दिशि दिशि मम श्रीमद्दर्शं पदाञ्चलपातिनः
क्षिणु करुणया दैन्यं गोपाल पालय मां विभो॥ १८॥

किमपि यमुनाकूले कूलङ्कषोदितयौवन-
प्रमदमहिलावासश्चौर्यप्रकारनिरङ्कुश।
पुटमधिपुटं स्त्यानप्राचीनसञ्चयमाशु मे
प्रणुद दुरितं दीनं गोपाल पालय मां विभो॥ १९॥

व्रजसुवदनावल्लीभिल्लीदरीगिरिगोकुल-
द्विषदभिमतप्रायोदञ्चत्प्रपञ्चविमोहन।
क्वचिदनुपलभ्याङ्घ्रिन्यासं चिराज्ञनिवर्त्मनि
श्रमपरिगतं दीनं गोपाल पालय मां विभो॥ २०॥

॥ इति श्रीमन्महालिङ्गकविविरचिता भयहरणगोपालविंशतिः समाप्ता॥

॥ शुभमस्तु॥

॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्द्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३४] कलि ५०६२ प्लव– वृश्चिक-धनुषी [सं ३-४
(1961–November–December)

# संस्कृतम्

सा विद्या या विनयं ददाति ।

विनयो नाम तादृशो बुद्धिसंस्कारः येन महत्त्वापादकेषु श्लाघ्येषु कर्मसु सर्वदा प्रावण्यं भवति, न तु कदाचिदपि अल्पत्वापादकेषु अत एव नीचेषु कर्मसु; येन च दयादाक्षिण्यादीनां गुणानां उन्मेषो भवति, कामक्रोधादीनां दोषाणां निरोधश्च ।

अयं विनय एव देशान्तरभाषायां 'कल्चर्' इत्युच्यते ।

अयं विनयः येषां सम्पन्नः ते ग्रामे वसन्तोऽपि नागरिका भवन्ति । येषां न, ते नगरे वसन्तोऽपि ग्रामीणाः ।

नवीनप्रक्रियया अद्य कलाशालासु महता अर्थव्ययेन अधीयमाना विद्या विनयं न ददाति। केवलं जीवनोपायतया अधिगम्यते।

विनयाभावात् जनाः अर्थकामपरवशाः नीचं मार्गमाश्रित्य अकार्याणि कुर्वन्ति । तेन सर्वाणि सङ्कटानि उत्पद्यन्ते ।

चिरन्तनप्रक्रियया अधिगम्यमाना संस्कृतविद्या एका प्रजानां विनयाधाने क्षमा ।

यद्यपि कलाशालासु भाषात्रयव्यवस्थया संस्कृतस्य निरवकाशता कृता तथाऽपि सर्वैः यथाशक्ति संस्कृतपरिचये यतितव्यम्।

पाण्डित्यं कामं मा भूत्। रामायणपञ्चतन्त्रहितोपदेशादि-पठनमात्रोपयोगी यावान्, तावन्तं परिचयं सम्पाद्य इमान् ग्रन्थान् रघुवंशादींश्च स्वयं सर्वे अभ्यसितुमर्हन्ति। एवं कुर्वन्तः क्रमेण एषु स्थितानां उपदेशानां सारं विभावयन्तः विनीतमतयो भवेयुः।

अतः सर्वे यया कयाचन विधया संस्कृतपरिचये यथाशक्ति यतितुमर्हन्ति।

# रामराज्यम्॥

(उत्तमस्य राज्यस्य उत्तमो राजा)

वि. वि. श्री.

द्वितीयेऽङ्के द्वितीयं प्रेक्षणकम्

(अनुवृत्तम्)

रामः— धिक्। नेतः परमनया रीत्या भाषितव्यम्। किं त्वं धर्मं प्रति वेत्सि? धर्मं हि गुहायां निहितं मनुष्याणां दृशोर्बुद्धेश्च अगोचरं वदन्ति। स धर्मः न प्रत्यपकाररूपः, प्रहारे प्रतिप्रहार इति। अयं मे धर्मः, दिव्यो धर्मः, यत् अपकारे सति उपकारः क्रियते, क्षमा प्रदर्श्यते, अमार्गात् प्रत्यानीयते, अनुकम्पा क्रियते, साहाय्यप्रवणैर्भूयते।

मन्थरा— हा हा राम, साक्षाद् भगवान् भवान् मनुष्यरूपः।

रामः— न तथा भाषेथाः। मनुष्य एवाहं लक्ष्यसिद्धये उद्युञ्जे, प्रयस्यामि। मन्थरे, किं त्वमपेक्षसे?

प्रथमः पौरः— न केवलमेतां जरतीं पापां क्षमते महाराजः, मन्ये, प्रीतिप्रदानैरभिवर्षत्यपि।

रामः— कुतो न भ्रातः? अपि नाम त्वं तत्त्वतो जानासि यदेषा मम सीतायाश्च कृते, नूनं कृत्स्नस्य लोकस्य कृते, कृतवती? अनया विना, अधुना युष्माभिः भक्त्या श्रद्धया च सेव्यमानौ राजा राज्ञी च आवां नाभविष्याव। अनया विना आवयोः वनवासजनितः संस्कारः चित्तशुद्धिश्च नाभविष्यताम्। अनया विना गुहेन हनूमता सुग्रीवेण विभीषणेन च परिचयः सख्यं वा नाभविष्यत्। अनया विना रावणो युद्धे निहतो नाभविष्यत्; जगतश्च तत्कृत उपद्रवो न अशमिष्यत्।

मित्राणि, दैवगतिः दुरधिगमा, अमार्गगामिन्यपि च भवति। इयं मन्थरा देवानामुपकरणमासीत्। मम विश्वमित्रादनन्तरं इयं परमोपकारिणी। देहिनां कर्माणि, आपाततो यद् दृश्यते तेन, या तात्कालिकी चित्तवृत्तिर्जायते तयाऽपि वा, न निर्धारणीयानि। अपि तु फलैः। यथा वृक्षाः तदीयैः फलैः तथा।

प्रथमः पौरः— महाराज, तथा च भवान् इमां प्रासादं नीत्वा राज्ञया धात्रीं, धात्रीणां राज्ञीं च करिष्यति ?

रामः— भ्रातः, साधु भवान् अभाषिष्ट, युक्तं च। इदमेव साक्षान्मया कर्तुमुद्दिष्टम्। (पालकाध्यक्षमभिवीक्ष्य) अद्य, अध्यक्ष, इमां महिलां भवदीयैः पुरुषैरभिरक्षितां देव्याः सीताया भवनं नय। ब्रूहि च तां मद्वाचा 'अद्य प्रभृति प्रासादवर्तिनीनां सर्वासां धात्रीणां अधिपत्नी एषा। सप्रीति सबहुमानं च इयं वर्तयितव्या। इयं मे इच्छा। इयं मे आज्ञा। इमामादाय गच्छतु भवान्।

(पालकाध्यक्षः, तदादेशेन तमनुसरन्ती मन्थरा, तां परितः स्थिताः रक्षिणश्च निष्क्रामन्ति)

रामः–(जनसङ्घं प्रति) सर्वमिदमवसितम्। भ्रातरः; सर्वे यूयं विप्रस्थाय स्वं स्वं भवनं गन्तुमर्हथ। महदपचरितमद्य समाहितम्।

प्रथमः पौरः— मन्ये इदं तद् यद् रामराज्यमित्यभिधीयते !

द्वितीयः— नियच्छ वाचं, मूढ। यदि त्वं च अहं च न जानीवः, किं तत्परिवादः कर्तव्यः ?

रामः— आम्, अस्मत्प्रियसुहृदः, इदं रामराज्यम्। यदि यूयं रामकामाः रामराज्यमेव भवतां भविष्यति।

# कूटयुक्तिः

अस्मन्नौकासेनानीपदे स्थितस्य कस्यचित् गृहिणी अन्यस्मिन् अनुरक्ताऽऽसीत्। तेन अप्रीतः सः तं अन्यं तन्निवासस्थानं गत्वा नलिकदाहेन मारयामास। न्यायस्थले व्यवहारः प्रावर्तत। सेनान्यो

रक्षणाय नियुक्तो वागाजीवः "तस्य जारमारणे अभिसन्धिर्नैव आसीत्। तेन स्वहस्ते धृतं नलिकं आच्छिद्य ग्रहीतुं प्रवृत्ते जारे उभयोर्मल्लयुद्धमिवाभवत्। तत्र कथञ्चित् सङ्घट्टनं प्राप्तायां वर्तिकायां नलिकं स्फुटति स्म। ततो निर्गताभिर्गुलिकाभिः विद्धः जारः अम्रियत। अतः सेनानीः तद्वधापराधी न भवति" इत्येवं वादमकरोत्।

अस्मिन् वादे न कश्चित् अल्पमपि विश्वासमकरोत्। केवलं मिथ्यावादमात्रमेतदिति प्रथमाधिकरणात् प्रभृति उत्तमाधिकरणपर्यन्तं सर्वे प्राड्विवाका अजानन्, मुक्तकण्ठमवोचंश्च। बुद्धिपूर्वं वधं कृतवन्तं तं निश्चित्य तदायुष्कालव्यापिनं दण्डं च विदधुः।

अस्मद्देशे पूर्वकाले व्यवहारेषु तत्त्वनिर्णयः कथं कृत इति धर्मशास्त्रग्रन्थेभ्यो वयं ज्ञातुं शक्नुमः। अपराधित्वेन शङ्कितः (अभिशस्तः) यदि स्वस्य निरपराधत्वं साक्षिभिः प्रमाणैश्च निरूपयेत् तर्हि प्राड्विवाकः सभ्याश्च धार्मिकाः सन्तः तं अदण्ड्यं निर्णयन्ति स्म। यदि तथा निरूपयितुं न शक्नोति, केवलं अपह्नुते, अपराधित्वे संशयच्छेदीनि प्रमाणानि सन्ति तर्हि दण्ड्यं निरधारयन्। यदि पुनः अपराधित्वे अनपराधित्वे वा निश्चायकं किमपि प्रमाणं नास्ति, सन्देहः प्रबलोऽनुवर्तते, शङ्कितश्च अपह्नुते, तर्हि तप्तायोधारणादिदिव्यसाक्षिसमाश्रयेण निर्णयमकुर्वन्।

एवं वस्तुतोऽपराधिनोऽपि स्वापराधनिह्नवेन अनृतभाषणसम्भावना पूर्वमासीत्। कृतस्य अपराधस्य कृते विहितो दण्डः अनृतभाषणस्यापि कृते विहितोऽभूत्।

इदानीं तु अभिशस्तस्य निरपराधत्वस्थापनाय वागाजीवाः बुद्धिपूर्वमनृतं भाषन्ते। व्यवहारपद्धतिः एवमनृतभाषणमनुमन्यते। सर्वथा अनृतं भाषते वागाजीव इति निश्चयवतामपि प्राड्विवाकानां न स दण्ड्यो भवति। गर्हाऽपि तस्य न भवति। प्रत्युत प्रतिभाशालितया अभिनन्दनमपि क्रियते। कदाचित् बुद्धिपूर्वं अनृतवादिनां वागाजीवानां पक्ष एव तेषां वाक्चातुर्यवशेन विजयी भवति। तत्र दण्ड्यो न दण्ड्यते। अदण्ड्यो दण्ड्यते च। एवमधर्म्या साम्प्रतिकी व्यवहारपद्धतिः। अयमप्यधर्मः राष्ट्रे प्रजानां क्षेमहानये सम्पद्यत इति शास्त्रप्रामाण्यप्रत्ययवतां वक्तव्यं भवति। मतिमद्भिरत्यन्तं सावधानं साभिनिवेशं च पर्यालोचनीयोऽयं विषयः।

# ॥ वसुमान्-8 ॥

प्रभोः रत्नकान्तस्य गृहे विवाहसम्बन्धिनः सम्भ्रमाः समग्राः प्रादुरभवन् । ये रत्नकान्तस्य सुहृदः, ये च वसुमतः ते सर्वे आगत्य आहारमपि अत्रैव भुञ्जानाः गृहालङ्करणं, मुहूर्तमण्टपनिर्माणं, भोजनशालापरिष्करणं, महानसपरिकल्पनं, पात्रसम्भरणं, पुष्पमालाः, सराः, ताम्बूलपत्राणि, वासनाक्रमुकाणि, परिमलचन्दनानि, दधिपयोघृतानि इत्येषां कृते तत्तद्विक्रेतृपुरुषाणां नियमनम् , पाचकानां, वाद्यकाराणां, गायकानां, हरिकथाकालक्षेपकृतां भागवतानां च आमन्त्रणं इत्यादिषु कार्येषु व्यग्रा अभवन् ।

ललितावसुमन्तावपि "स्वस्यैव विवाहः, स्वयमेव वधूवरौ" इत्येतत् सर्वथा विस्मृत्य गृहे कश्चन उत्सव इति सामान्यतो मन्यमानौ यो यः यद्यत्पृच्छति तस्य तस्य तत्तदुचितं उत्तरं ददतौ, यो यः यद्यदपेक्षते तस्मै तस्मै तत्तत् सम्भृत्य समर्पयन्तौ चक्रवत् परिभ्रमन्तौ अभवताम् । परश्वो विवाहः । तदानीं लेखवाहः एकं लेखमानीय वसुमते अदात् । तमुद्घाट्य मातुलान्या लिखितं तं जानन् स्वगतं पपाठ । तत्रैवं लिखितमासीत्—

"स्वस्ति । आयुष्मन् वसुमन् !

"इतः प्रस्थाय गतस्त्वं कुशली वर्तसे । सर्वसम्पत्समृद्धोऽसि । प्रख्यातस्य प्रभोः कन्यां परिणेष्यसि" इति जानती अहं प्रमोदे । त्वामहं सद्यो दिदृक्षे । त्वयि वक्तव्यं मे बह्वस्ति । तव विवाहे सर्वे वयं सन्निधातुमभिलषामः । परं तु सद्यस्त्वया इह आगत्य गन्तव्यम् । सुज्ञातमिदं मे यत् त्वं कल्याणकार्यकलापे अतिमात्रं व्यापृतो

भवेः। तथाऽपि अगत्या श्रमं ते ददामि। सकृदागत्य गच्छ। दृढं प्रत्येमि न त्वमुपेक्षिष्यसे। अन्यत् समक्षम्।

इति

भवत्क्षेमकाङ्क्षिणी

मातुलानी।"

यथा मातुलः न तथा मातुलानी। वसुमान् यावत् तद्गृहे उवास तावत् सा तस्य विप्रियं किमपि नाचरत्। न तं निनिन्द। न क्रौर्यं दर्शयामास। अतः सः तदीयं लेखमनुवाच्य तदभिलाष-पूरणं कर्तव्यममन्यत।

तस्मिन्नेव दिने सायं गत्वा तां द्रष्टुकामः प्रस्थानात् प्राक् निरञ्जनायाः सविधमेत्य "अस्ति मे कश्चिन्मातुलः, यः मातापितृ-विहीनं शिशुं मामानीय कञ्चित्कालं पोषितवानपि पश्चात् केनापि निमित्तेन अतिमात्रं कुपितः निर्दयं निर्दाक्षिण्यं गृहान्निष्कासयामास। कृतमुपकारं स्मरन् अहं इच्छायां सत्यां काममागच्छत्विति मन्य-मानः शुभमुहूर्तपत्रिकां प्रैषयम्। तां दृष्टवती मातुलानी मह्यं लिखति 'मया सा सद्यो द्रष्टव्या' इति। अतोऽद्य गत्वा त्वरितं निवर्त्स्यामि" इति निवेदयामास।

तदाकर्ण्य प्रहृष्टा सा "दिष्ट्या सन्ति केचित् भवद्बन्धवः, ये वत्सायाः कल्याणे अस्माभिः कर्तव्यान् सम्बन्ध्युपचारान् प्रतिगृह्य तमंशं अविकलं करिष्यन्ति। अवश्यं गच्छतु भवान्। सनिर्बन्धं च ते आह्वातव्याः। यदि तेषां अत्र आगमनप्रतिरोधि किमपि असौकर्यं भवेत् तद्विचार्य विज्ञाय परिहर्तव्यम्। यथा ते सर्वे अस्खलितमागच्छेयुः तथा सर्वं भवान् करोतु" इति कर्तव्योपदेश-पुरस्सरं सादरमभिधाय तं त्वरितं प्रस्थापयामास।

मत्या दयया च सम्पन्नः वसुमान् स्वयमेव एवं कर्तव्यमिति चिन्तयन्नासीत्। तत्संवादिनमुपदेशं कुर्वत्या निरञ्जनया व्यञ्जितेन प्रेमातिशयेन सुप्रीतः सः विना विलम्बं प्रस्थितः मध्येमार्गं आपणेषु द्राक्षाः, खण्डशर्कराः, उत्तमाः कदलीश्च क्रीत्वा आदाय शकटेन मातुलगृहं गत्वा अन्तः प्रविश्य शालायां शय्याफलके उपविष्टस्य मणिबाहोर्मातुलस्य पुरस्तात् उपहारवस्तूनि निक्षिप्य तं प्रणनाम।

वपुषा वस्त्रेण वज्रकुण्डलाभ्यां अङ्गुलीयकैश्च समुज्ज्वलं वसुमन्तं किञ्चिन्निर्वर्ण्य प्रत्यभिजानन् मणिबाहुः 'कच्चित् कुशलं तात?' इति पृष्ट्वा ततः परं किमपि नोवाच। "आम्, कुशलम्" इत्युक्त्वा त्रिचतुरान् क्षणान् स्थित्वा ततः परं वसुमान् 'मातुलानीं प्रणमामि' इति विज्ञाप्य "मामि" इति सम्बोधयन् महानसं प्रत्यगच्छत्।

आह्वानशब्दमाकर्ण्य बहिरागता तस्य मातुलानी नलिनी तं वीक्ष्य क्षणं मन्थरं स्थिता अनन्तरक्षणे सुसम्पन्नप्रत्यभिज्ञा "एहि तात। चिराय मे दिष्टक्षितस्त्वाम्। तव निवासं हि न जानामि। त्वां दृष्ट्वा सनाथमात्मानं, अथवा कुटुम्बमिदं मन्ये। दिष्ट्या त्वं महत्यभ्युदये वर्तसे। अभिजाते आढ्ये प्रख्याते महाकुले तव उद्वाहं परश्वो भाविनं श्रुत्वा प्रमुदिताऽस्मि। तात, नैष कालः अस्य कुटुम्बस्य दुरवस्थां त्वयि निवेदयितुम्, तेन तव खेदमुत्पादयितुं च। तथाऽपि किं कुर्याम्। विवाहमण्टपे अनुरूपया वध्वा सङ्गतं उद्वाहवेषेण दीप्यमानं त्वां द्रष्टुं बलवदुत्सुकाऽस्मि। अशक्तिस्तु महतीं वेदनां करोति। जीवति मे भर्ता। अस्ति मे पुत्रः। अस्ति मे पुत्री। तथाप्यनाथैवास्मि। अशनमपि पर्याप्तं न लभ्यते। आच्छादनसमृद्धिः मद्दर्शनमात्रेण

ते सुग्रहा । महता समारोहेण प्रवर्तमानप्रभुगृहकल्याणसभाया-मागत्य कथं नाम एवं दुर्गतमात्मानं सर्वजनदृष्टिगोचरं कुर्याम् । तथैव हि अगौरवाय तत् कल्पेत । ............... इत्यविच्छिन्नं आर्तिभरितं भाषमाणा अनुपरतैवासीत् ।

तावत् सुज्ञाततद्गृहस्थितिः वसुमान् " मामि, इदमिदानीं गृहाण । अनेन सर्वं संविधानं सम्पन्नं कृत्वा सर्वैः सह श्वो रात्रावेव तत्र आगता भव । विशालं अपेक्षणीयसकलवस्तुविशिष्टं च पृथक् वासस्थानं ते परिकल्पयामि " इत्युदीर्य पञ्च शतानि रूप्याणि रूप्यभस्त्रिकात आदाय दत्वा ' किमियताऽलम् । अथवा भूयोऽपेक्ष्यते ?' इति पप्रच्छ । विस्मितया तया " अलमलम् । इदमेव बहु " इत्युक्ते " साधु । अवश्यं सर्वैः सह आगच्छ । अस्ति मे कर्तव्यं बहु । साधयामि " इत्यामन्त्र्य तस्याः पुनर्भाषणावकाशं अदददेव निवृत्य स्मितेनैव मातुलस्यानुज्ञां प्रार्थ्य बहिरागत्य शकटमारुह्य स्वगृहानगच्छत् ।

## ॥ रघुवंशः ॥

क्व सूर्यप्रभवो वंशः क्व चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥

सूर्यादुत्पन्नः वंशः क्व कुत्र । अतिमहान् । अल्पो विषयः यस्याः सा अल्पज्ञा मदीया बुद्धिः क्व कुत्र । अत्यन्तं निकृष्टा । अशक्ता । एवमत्यन्तं अल्पज्ञया मत्या अत्यन्तं महान्तं सूर्यवंशं वर्णयितुं प्रवृत्तोऽहं कथमस्मीति चेत्; अशक्यविषयप्रवृत्तिकारिणा मोहेन अज्ञानेन हेतुना, दुस्तरं अगाधत्वात् विस्तृतत्वाच्च तरितुमशक्यं, समुद्रं, उडुपेन मन्दवातः लघुतरङ्गः इत्यादिरूपेण स्वल्पेन निमित्तेनापि सद्यो मङ्क्त्वा विनाशार्हेण प्लवेन, तर्तुमभिलषन् कश्चिद्यथा भवेत् तथाऽस्मि ।

पूर्वस्मिन् श्लोके 'वागर्थप्रतिपत्तये' इत्यनेन "शब्दार्थमयं कञ्चन ग्रन्थं कर्तुं प्रवर्ते," इति व्यञ्जयामास। अथानेन श्लोकेन तस्य ग्रन्थस्य प्रतिपाद्यो विषयः सूर्यवंश इति ज्ञापयति।

**मन्दः कवियशःप्रार्थी गमिष्याम्यपहास्यताम्।**
**प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः॥ ३॥**

मन्दः अज्ञः अहं प्रज्ञाप्रतिभाविशेषशालिनां कवीनां यत् यशः उत्तममहाकाव्यकर्ता अयमिति प्रथा तत् लब्धुमभिलषन् अपहास्यतां परिहसनीयतां गमिष्यामि। अत्रोपमा। उन्नतैःपुरुषैः अपचेये फले तृष्णया तदपचयाय उद्धृतभुजः वामन इव। स यथा बुद्धिमतां अपहास्यो भवति, तथाऽहमपीति।

श्रीवेङ्कटनाथः शरणागतिदीपिकानाम्नि स्वकीये भगवत्स्तोत्रे

उद्बाहुभावमपहाय यथैव खर्वः
प्रांशुं फलार्थमभियाचति योगिचिन्त्य।

इत्याह। वामनः प्रांशुलभ्ये फले लोभात् यद्यपि प्रथमं उद्बाहुर्भवति तथाऽपि स्वहस्तेन दुष्प्रापं फलमिति यदा जानाति तदा सपदि उद्बाहुभावं विहाय सन्निहितं गुणवन्तं प्रांशुं 'इदं फलमवचित्य मे देहि' इति प्रार्थ्य दयालुना तेन अवचित्य दत्तं तत् आस्वाद्य सम्पन्नमनोरथो भवति। अज्ञस्य कवियशस्तु एवमन्यसाहाय्येन दुष्प्रापम्। अन्यदीयं काव्यं एष स्वकीयं वदतीति अपयश एव भवेत्। यथा इतरो यः कोऽपि न जानाति तथा केनचित् कविना रसवत् काव्यं कारयित्वा स्वकृतत्वेन प्रख्याप्य अज्ञोऽपि कवियशो लभेतेति चेत् काममेवम्। न तु प्रकृते ईदृशो दुर्जनो मन्दो विवक्षितः। तस्य गमिष्याम्यपहास्यतामित्युक्तापहास्यत्वप्रसङ्गविरहात्। अज्ञत्वेन यः सर्वजनविदितः सः स्वयं महाकाव्यं किमपि कवियशःप्रेप्सया कर्तुं प्रवृत्तः अपहास्यो भवति, इति प्रकृतम्। तत्र प्रांशुलभ्यं फलं स्वयमेव आदातुमिच्छन् उद्धृतबाहुः वामन उपमानमिति कामं युक्तम्। परन्त्वत्र फलमेवोद्देश्यम्। इदं वामनस्य स्वयत्नेन दुष्प्रापमपि अन्यसाहाय्येन सुप्रापमेव। तस्मादिदमुपमानं अज्ञस्य अन्यसाह्येनापि दुष्प्रापस्य कवियशसः अत्यन्तमनुरूपं न भवतीति श्रीवेङ्कटनाथस्य अभिप्राय इति भाति।

अत्रेदं बोध्यम्। मन्दः शनिः। कविः शुक्रः। शनिरहं शुक्रयशःप्रार्थी अपहास्यतां गमिष्यामीति ध्वन्यर्थः। अनेन शुक्रयशः

प्रार्थी शनिरिव महाकवियशःप्रार्थी अज्ञोऽहं अपहास्यतां गमिष्यामीति उपमा व्यज्यते। इदमुपमानं उपमेयस्य अत्यन्तानुरूपम्। न ह्यन्यसाह्येनापि शनेः शुक्रयशः सुलभम्, इति। कालिदासवेङ्कटनाथयोः हृदये गूढं स्थितमिदम्।

सूर्यप्रभवराजपरम्परां विषयीकृत्य मया क्रियमाणोऽयं प्रबन्धः महाकाव्यरूप इति ज्ञापने कवेरत्र तात्पर्यम्।

# ॥ पुस्तकपरामर्शः ॥

**श्री देवनायकसुप्रभातम्, श्री देवनाथप्रपत्तिः, श्रीतोताद्रिनाथमङ्गलाशासनं च।** वानमहाचलनिवासिना विदुषा आ. गोपालय्यङ्गार्- अनेन विरचितानि। Sri A. Gopala Iyengar, Siromani, Nanguneri post, Tirunelveli Distreet. मूल्यम् 25 नव्यपैसाः।

श्रीवेङ्कटेशसुप्रभातादीनि सम्प्रति सर्वत्र प्रसिद्धानि। शनिवारादिषु आकाशवाण्यपि तानि पठति। यथा वेङ्कटाद्रौ तथा स्वस्वक्षेत्रस्थदेवालयेऽपि सुप्रभातादिकमनुसन्धेयमिति भक्तिमतामभिलाषो भवति। विदुषः प्रार्थ्य तैर्निर्मितं तत्र तत्र अनुसन्दधते च। स्वयं महापण्डितः कविः आस्तिकाग्रेसरश्च सन् श्रीगोपालय्यङ्गार्- स्वक्षेत्राधीशभगवद्विषया इमाः कृतीश्चकारेति युक्तमेतत्। श्रीवानाद्रिभगवदालये प्रत्यहं प्रातः आसामनुसन्धानसंविधानं क्रियेतेति प्रतीमः। प्राचीनसम्प्रदायमनुरुध्य सुप्रभातप्रपत्ती वसन्ततिलकावृत्तेन, मङ्गलं अनुष्टुभा च निबद्धानि। प्रायः श्लोकेषु श्रुत्यनुप्रासो दृश्यते।

स्थलपुराणेन ऐतिह्यैश्च अवगम्यानां वृत्तान्तानां ज्ञापका विषयास्तत्रतत्र ग्रथिताः। कविप्रतिभोपज्ञेयाश्च बहवः। तत्रेदमेकमुदाहरणम्—

श्रीपङ्कपङ्कजसरोवरराजहंसा देवीसहस्रमणिनूपुरशिञ्जितानि।
तल्पोद्गमावसरजान्यनुकर्तुकामाः शय्यां त्यजन्ति परितस्तव सुप्रभातम्॥

# प्रकृतिभेदः

धन्वी— भ्रातः, ग्रामात् तत्रभवान् पिता लिखति।
चक्री— किमिति ?

ध— धनं किञ्चिदपेक्ष्यत इति।

च— नूनमावां धनपरिग्राहिणौ मन्यते पिता।

ध— आवयोः धनं परिग्रहतु मा वा। पिता अपेक्षते। आवाभ्यां पुत्राभ्यां तस्य अपेक्षा पूरणीया।

च— नूनं अद्यतनो रामस्त्वम्। कामं पितृवाक्यमनुतिष्ठ।

ध— पञ्च शतानि अपेक्षते। तावद् धनं कुतो मयि ?

च— तत् सर्वमस्तु। इदं पर्यालोचय। तौ द्वौ वृद्धदम्पती ग्रामे वसतः। शालिक्षेत्राणि विंशतिः सन्ति। धान्यक्षेत्राणि च ततोऽधिकानि। कृषीवलाः स्वयं कृषिं कृत्वा फले अर्धाधिकं भागं ददति। दोग्ध्र्यो गावो महिष्यश्च गृहे सन्ति। गृहारामे शाकान्यपि सर्वाण्युत्पद्यन्ते। गृहभाटको न देयः। इन्धनं न क्रेयम्। व्रीहीन् वा अन्यद्वा किमपि वस्तु अस्मदुपयोगाय न प्रेषयति। एवं सति नगरे क्लिष्टवासं कुर्वतोः आवयोः सकाशात् यदि पुनः पुनः शतानि शतानीति धनमपेक्षते किमेतन्न्याय्यम् ? नूनं पिता गुरुः। गुरूणामपि किं न्यायो नास्ति ? धर्मो नास्ति ? आवाभ्यां अभिवृद्धकुटुम्बाभ्यामत्र अनुभूयमानं क्लेशं किंतु स मनागपि जानाति ?

ध— भ्रातः, परमार्थं भाषसे। न परमेतावत्। धान्यविक्रयेण लभ्यमानं धनं न अल्पम्। तत्सर्वं स कथं व्यययतीति न ज्ञायते। उपरि ऋणमपि किमादत्ते, न जानीमः।

च— एवं सति कथं मन्यसे यदा यदा लिखति तदा तदा धनं प्रेषणीयमिति ?

ध— गुरूणामाज्ञा अविचार्य अनुष्ठेया ।

च— न्याये स्थितानाम् ।

ध— ते न्याये तिष्ठन्ति न वेत्येतदपि अस्माभिर्न विचारणीयम् ।

च— अतो ब्रवीमि— त्वमद्यतनो रामः । अहमन्यो यः कोऽपि ।

## ॥ श्री लक्ष्मीपञ्चाशत् ॥

विद्याभूषणं, चिलुक्कूर् मा॰ वेङ्कटराघवाचार्यः, शिरोमणिः

विष्णोर्वक्षो निलयो निलयस्ते देवि बिल्वशाखी वा ।
स्थानं योगिहृदब्जं ब्रह्माहो क्षीरसागरो वौकः ॥ २३ ।

घण्टाकर्णोऽपि रमे मत्पापिष्ठाद्वरो हरेर्नाम्ने ।
द्रुह्यन्पतिं यतस्ते स्मरेत्सदाऽसौ च वैरिबुद्ध्या वा ॥ २४ ॥

अपराधचक्रवर्ती वर्तेऽतः कामकोपमुखभूपाः ।
करदानजागरूका नयन्ति मां भक्तिपल्वलात्तीरम् ॥ २५ ॥

सेवे भवतीं मूर्ध्ना नष्टं मे तत्तु सार्वभौमत्वम् ।
देवि त्वत्परिचारकपदसेवादास्यमेव मेऽभीष्टम् ॥ २६ ॥

स्तोतुं त्वद्गुणनिवहं जेतुं वादाहवेष्वरातींश्च ।
गातुं रमेशगीतं कुरु वासं मानसे रमे मे त्वम् ॥ २७ ॥

नो चेद्रक्षसि विष्णोः स्थानन्ते देवि मादृशो जन्तुः ।
अपराधाब्धिविहारी विन्देत कथं भवाम्बुधेः पारम् ॥ २८ ॥

वैकुण्ठोऽपि हि कान्तो लुण्ठितपापं जनं चिकीर्षुस्ते ।
सर्गावनादिकृत्ये त्वद्भ्रूभङ्गान्भृशं प्रमाणयति ॥ २९ ॥

५०१ सर्वतः पाणिपादं तत्सर्वतोक्षिशिरोमुखम् ।
सर्वतश्श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥ १३ ॥

'पाणिपादा'दिशब्दैः पाण्यादिकार्यशक्तियोगो लक्ष्यते । तत्-परिशुद्धात्मस्वरूपं, सर्वतः पाणिपादम्- सर्वतः पाणयः पादाश्च यस्य तत् सर्वतः पाणिपादम्, पाण्यादिकार्यं ग्रहणगमनादिकम्, तत् परिशुद्धात्मनः न केवलं पाण्यादीन्द्रियैरेव निष्पाद्यते; किन्तु सर्वतः पाण्यादिकं विनैव भवति । करणानधीनतत्तत्कार्यनिष्पत्तौ तात्पर्यम् । 'अपाणिपादो जवनो-ग्रहीता' इति श्रुतं परमात्मनि । मुक्तस्यापि परमात्मसाम्यात् करणानधीन-तत्तत्कार्यशक्तत्वं संभवति । सर्वतोक्षिशिरोमुखम् सर्वतः अक्षीणि शिरांसि मुखानि च यस्य तत् सर्वतोक्षिशिरोमुखम् । 'पश्यत्यचक्षुः' इति परमात्मन उक्तरीत्या तत्साम्यापन्नं मुक्तस्वरूपमपि विनैव चक्षुरादिकं तत्तत्कार्य-जननसमर्थम्, सर्वतश्श्रुतिमत्- 'स शृणोत्यकर्णः' इत्युक्तरीत्या श्रोत्रान-धीनश्रावणज्ञानयुक्तम्, लोके- जगति, सर्वमेव- वस्तुजातम्, आवृत्य-धर्मभूतज्ञानेन व्याप्य, तिष्ठति- स्थितिं लभते । अप्रच्युतव्याप्तिकं भव-तीति यावत् । सर्वतः इति पदत्रयं सर्वत्र देशे इत्यर्थकमपि संभवति ।

பரமாத்மாவிற்குக் கண் கை கால் முதலிய காரணங்களின்றியே பார்வை முதலிய கார்யமுண்டென்கிறது ச்ருதி. அவனோடு ஸாம்யம் பெற்ற முக்தாத்மாவிற்கும் காண்பது கேட்பது முதலிய வியாபாரங்கள் கண் காது முதலிய காரணங்களால் வந்தவையன்று; இயற்கையானவையே. உலகிலுள்ள வஸ்துக்களனைத்தையும் தன்னுடைய தர்மபூதஜ்ஞானத்தினாலே எப்பொழுதும் வியாபித்து நிற்கிறான் முக்தாத்மா.

५०२ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम् ।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ॥ १४ ॥

सर्वेन्द्रियगुणाभासम्- सर्वाणि च तानि इन्द्रियाणि च सर्वेन्द्रियाणि एकादशेन्द्रियाणि, तेषां गुणाः- वृत्तयः, सर्वेन्द्रियगुणैः- आभासः- विषयावभासयोग्यता यस्य तत् सर्वेन्द्रियगुणाभासम्- इन्द्रियैर्विनैव सर्वेन्द्रियवृत्तिभिरपि विषयान् ज्ञातुं समर्थम् । सर्वेन्द्रियविवर्जितम्- कदाचिदिन्द्रियसहितमपि स्वभावतः सर्वेन्द्रियैः विरहितम्, विनैवेन्द्रिय-

वृत्तिभिः स्वत एव सर्वज्ञम्, असक्तम् स्वभावतो देवादिदेहसङ्गरहितम्, सर्वभृच्चैव– देवादिसर्वदेहभरणसमर्थं च । 'स एकधा भवति, त्रिधा भवति' इति शुद्धावस्थायां देहद्वारा त्रिधाभवनादिश्रुतेः । निर्गुणं– अत्र गुणशब्देन सत्त्वादिगुणभोगो लक्ष्यते; 'गुणभोक्तृ च' इत्येतत्प्रतिक्षेपरूपत्वात्, स्वभावतः सत्त्वादिगुणभोगरहितम्, गुणभोक्तृ च-- सत्त्वादीनां गुणानां भोगसमर्थं च, औपाधिकं गुणभोक्तृत्वं, स्वभावतस्तदभावः गुणभोक्तृत्वसामर्थ्यमात्रं तु नित्यम् ।

*சுத்தாத்மாவானது– இயற்கையில் இந்திரியங்களொன்றுமில்லாதது. இந்திரியங்களைக்கொண்டு பதார்த்தங்களை அறியும் யோக்யதையுமதற்கு உண்டு. கர்மமூலமான தேஹஸம்பந்தமின்றிக்கே அனேக தேஹங்களைப் பரிக்ரஹணம் செய்யும் ஸாமர்த்யமுடையது. அவ்வாறே ஸத்துவம் முதலிய குணங்களாலுண்டாகும் போகமானது இயற்கையில் கிடையாது. ஆகிலும் தன் ஸங்கல்பத்தாலே அந்த போகமுமிவ்வாத்மாவிற்கு உண்டு.*

५०३ बहिरन्तश्च भूतानामचरं चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेयं दूरस्थं चान्तिके च तत् ॥ १५ ॥

भूतानम्– आकाशादीनां पञ्चानां देहादिरूपेण संहतानाम्, बहिः– अशरीरत्वान्मुक्तस्वरूपं तद्बहिर्भूतम्, अन्तश्च– 'जक्षत् क्रीडन् रममाणः' इति श्रुतिसिद्धस्वच्छन्दवृत्तिषु भूतानामन्तश्च वर्तते, अचरं पादाद्यधीनसञ्चाररहितम्, चरमेव च देहित्वे सति सङ्कल्पे चरिष्णु च, तत्– शुद्धस्वरूपम्, सूक्ष्मत्वात्– अतिसूक्ष्मतयेन्द्रियागोचरत्वात्, अविज्ञेयम्– संसारिणां देहात् विविच्य ज्ञातुमनर्हम्, तत्– पूर्वोक्तं शुद्धस्वरूपम्– दूरस्थं च संसारिणामयोगिनां दुर्ग्रहम्, अन्तिके च अमानित्वाद्युक्तात्मज्ञानसाधनसंपन्नानां समीपे च वर्तते– सुग्रहमिति यावत् ।

*பரிசுத்தஸ்வரூபமானது சரீரமில்லாத தசையில் பஞ்சபூதங்களுக்குப் புறம்பானதாய், ஸங்கல்பத்தினுல் தேஹத்தை ஸ்வீகாரம் செய்யும்பொழுது தேஹத்திற்குள்பட்டதாயுமிருக்கும்; கர்மவச்யரைப்போல் கால்களாலே ஸஞ்சாரமென்பது அதற்குக் கிடையாது. தேஹத்தை ஸங்கல்பிக்கும்பொழுது கால்களாலும் ஸஞ்சரியா நிற்கும். இந்த்ரியங்களுக்கு எட்-*

டாத மிக்க ஸூக்ஷ்மத்தன்மையுடையது. ஆதலால் சரீராதிகளில் வேறுபட்டதாக ஸம்ஸாரிகளுக்கு அறியவியலாதது. அமாநித்வம் முதலிய முன் சொல்லிய ஸாதநங்களுடையவர்களுக்கல்லது அது அறியவியலாதது. அவையுடையவர்களுக்கு அறியக்கூடியதே.

५०४ अविभक्तं च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेयं ग्रसिष्णु प्रभविष्णु च ॥ १६ ॥

तत्- शुद्धस्वरूपम्, भूतेषु- सर्वप्राणिषु, अविभक्तम्- स्वरूपेण देवत्वादिविभागरहितम्, विभक्तमिव च- अविदुषां देवाद्याकारेण विभागवदिव, स्थितम्- उपलभ्यमानम्, भूतभर्तृ च - भूतानि बिभर्ति इति भूतभर्तृ, देहस्वरूपेण संहतानां पृथिव्यादिभूतानां आधारभूतम्, अतो भर्तव्येभ्यो भूतेभ्यस्तद्भर्तृ तदन्यत्, ग्रसिष्णु- अन्नादीनां भौतिकानां ग्रसनशीलं, ग्रस्यमानेभ्यस्तेभ्योऽन्यत्, प्रभविष्णु च- प्रभवोऽत्र रेतोगर्भादिरूपेण परिणामः, ग्रस्तानामन्नादीनां रसमलधात्वादिरूपेण रेतोगर्भादिरूपेण च परिणामस्य हेतुः, ज्ञेयम्- उदाहृतेभ्यो भूतादिभ्योऽर्थान्तरमिति ज्ञातुं शक्यम् ।

ஆத்மஸ்வரூபமானது தேவன் மனுஷ்யன் என்றாற்போலுள்ள வேற்றுமையற்றது. அஜ்ஞர்களுக்கு ஸ்வரூபமே தேவன் மநுஷ்யன் என்றாற்போல் வெவ்வேறாகத் தோன்றுகிறது. பஞ்சபூதங்களாகிய சரீரத்தை தரிக்கின்றமையால் தரிக்கப்படும் சரீரமுமிதுவும் ஒன்றன்று. அன்னம் முதலிய உண்ணப்படும் வஸ்துவைப் பார்க்கிலும் அதை உண்ணுமதாகிய ஆத்மா வேறானது. உண்ணப்படும் ஆகாரத்திற்கு ஜீர்ணம் செய்வித்துப் பல பல பரிணாமங்களைச் செய்கின்றமையாலும் அந்நாதிகளில் வேறுபட்டது ஆத்மவஸ்து என்று அறியவும்.

५०५ ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते ।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम् ॥ १७ ॥

तत्- आत्मस्वरूपम्, ज्योतिषामपि- अन्यप्रकाशकानां दीपादित्यादीनां प्रकाशकानामपि, ज्योतिः- ज्ञानाख्यस्वधर्मद्वारा प्रकाशकम्, प्रभा-

KENDRIYA SANSKRIT VIDYA PEETHA TIRUPATI LIBRARY

द्वारा दीपादय इव स्वधर्मभूतज्ञानद्वारा प्रकाशकमात्मस्वरूपम्। तमसः- यस्य 'तमश्शरीरमि'त्याद्युक्तायास्सूक्ष्मप्रकृतेः, परम्- अन्यत्, उच्यते- 'निर्गुणः प्रकृतेः परः' इत्यादिष्वभिधीयते। (अतः) ज्ञानं- ज्ञेयम्-ज्ञानैकाकारमिति विलक्षणतया ज्ञातुं शक्यम्, ज्ञानगम्यम्-ज्ञायते अनेन इति ज्ञानम्। अमानित्वादिना पूर्वोक्तेन साधनेन प्राप्तुं योग्यम्, सर्वस्य- मनुष्यादेः पिण्डस्य, हृदि- हृदये- विष्ठितम्- विशेषेण स्थितम् स्वरूपेण सन्निहितम्, 'सर्वस्य गृहेऽप्ययमेव व्रीहिः' इतिवत् जात्यैक्यविवक्षया सर्वस्य हृदि स्थितिनिर्देशः॥

ஒளியினால் வஸ்துக்களைப் பிரகாசம் செய்விக்கும் தீபம் முதலியவற்றுக்கும் இவ்வாத்மாவினுடைய ஜ்ஞானமாகிற தர்மத்தினாலேயே பிரகாசம் ஏற்படுகிறது. ஆதலால் எல்லாவற்றிற்கும் பிரகாசத்திற்குக் காரணம் ஆத்மாவே. ஸூக்ஷ்மப்ரக்ருதியிலும் வேறுபட்டுள்ளது ஆத்மஸ்வரூபம். ஆதலால் ஜ்ஞானஸ்வரூபமென்றே இதை அறியவேண்டும். முன்கூறிய மாநித்துவம் முதலிய ஸாதநங்களால் இவ்வாத்மவஸ்துவை அறியவேண்டும். எல்லோருடைய ஹ்ருதயத்திலும் ஜ்ஞானாகாரமான ஆத்மஸ்வரூபம் நித்யம் ஸந்நிதானம் பெற்றுள்ளது.

५०६ इति क्षेत्रं तथा ज्ञानं ज्ञेयं चोक्तं समासतः।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते॥ १८॥

'उपसंहरन्नुक्तयाथात्म्यज्ञानस्य फलं चाह'— इति- एवम्, क्षेत्रम्- शरीरस्वरूपम्, तथा- क्षेत्रवत्, ज्ञानम्- अमानित्वादि ज्ञानसाधनम्, ज्ञेयं च- क्षेत्रज्ञस्वरूपं च, समासतः- संक्षेपतः, उक्तम्- अभिहितम्। 'महाभूतान्यहङ्कारः' इत्यादिना 'चेतनाधृतिः' इत्यन्तेन देहतत्त्वं सङ्गृहीतम्। 'अमानित्वं' इत्यादिना 'तत्त्वज्ञानार्थचिन्तनम्' इत्यन्तेन आत्मज्ञानसाधनमुक्तम्। 'अनादि मत्परम्' इत्यादिना 'हृदि सर्वस्य विष्ठितम्' इत्यन्तेन क्षेत्रज्ञयाथात्म्यं संक्षिप्तम्। एतत्- क्षेत्रक्षेत्रज्ञतत्प्राप्त्युपायानां याथात्म्यम्, मद्भक्तः- मयि वासुदेवे भक्तिमान् सन्, विज्ञाय- विशेषेण ज्ञात्वा, मद्भावाय- मम भावः स्वभावः- असंसारित्वं, तस्मै उपपद्यते- ज्ञानजन्ययोग्यतावान् भवति॥

Registered No M 2300.

Book XXXIV ॥ श्रीः ॥ Nos. 5-6

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

:o:

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३४] कलि ५०६३ प्लव – मकर-कुम्भौ [सं ५-६

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

January & February 1962.

In case you have not received the previous number please inform the Editor or Publisher immediately.

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।

२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।

३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्ख्यिकादिरेव पत्रिका प्रेष्येत ।

४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।

५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।

६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)

७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— **S. Vijayaraghavan,**
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1 बृन्दावनाष्टकम् ।
2 कुवलयाञ्जलिः ।
3 नादः उत नागः ।
4 वसुमान्-9
5 रघुवंशः ।
6 रामराज्यम् ।
7 पुस्तकपरामर्शः ।
8 प्रकृतिभेदः ।
9 श्री लक्ष्मीपञ्चाशत् ।

KENDRIYA SANSKRIT VIDYAPEETHA
३३
TIRUPATI.
LIBRARY.

श्रीः

# बृन्दावनाष्टकम्

बृन्दावननिकुञ्जेषु गोपीबृन्दोपसेवितम् ।
अतसीगुच्छसच्छायं बालकृष्णमुपास्महे ॥

अह्नोऽत्यये पथि नियम्य दिनस्य भर्तु-
र्गाः पूरयन् स्वमुरलीममृतप्रवाहैः ।
गोवर्धनाचलनितम्बविलम्बिबिम्बः
सन्नद्धपीवरपयोदरुचिर्मुकुन्दः ॥ १ ॥

वंशीविनिःसृतमनोहरगीतिरीतिं
चिन्तासु माधव निशम्य तव क्षणं स्वम् ।
आनन्दतुन्दिलमनाः प्लवमानमेव
पीयूषसागरतरङ्गचयेषु जाने ॥ २ ॥

बिम्बोष्ठचुम्बिवरवेणुसमुज्ज्वलोप्त-
रत्नांशुभिः कुसुमिताङ्गुलिरन्ध्रभागम् ।
नीलायताक्षमनुचिन्तयतो मम त्वां
सामर्थ्यमुल्लसतु गानकलाविलासे ॥ ३ ॥

संख्यातिगाभिरनिशं व्रजसुन्दरीभि-
रापीयमानरस एव वने वने यः ।
वेणोर्मुखेन वनसीम्नि सुधां प्रवर्ष-
त्यक्षीणसारमधरं तमभीक्ष्णमीडे ॥ ४ ॥

बृन्दावनेऽथ विजने परिरभ्य च त्वा-
माचुम्ब्य माधव तवाधरमात्ततृष्णाः।
उन्मन्मथास्तव किलाङ्कमुपाश्रयन्ति
श्रान्ताः स्वयं युवतयो मुनिबृन्दवन्द्याः॥ ५ ॥

राधे त्वदाननरुचिर्विनिहन्ति चन्द्रं
नेयं पुरस्थतमसोऽपि हृदं भिनत्ति।
मा कुप्य चण्डि ननु लोलतमोऽसि धूर्त
मन्तोर्न हि स्मर शुभे चरणानतोऽस्मि॥ ६ ॥

आरुह्य शैलमबले विजने भ्रमावो
ग्राव्णां हि तत्र चरणौ न चये प्रदेयः।
वोढाऽस्म्यहं न वसुधाऽभिनवा सुधा त्वं
नूनं ममेत्यनुसरञ्जयति प्रभुस्ताम्॥ ७ ॥

रात्रिर्गतार्धमपि कुप्यति नन्ददेवो
दुर्दान्त एष न चिरादपि सन्निवृत्तः।
इत्थं क्रुधा वनभुवं वटुभिः परीक्ष्य
राधाविटो विजयते गृहमाशु नीतः॥ ८ ॥

॥ इति श्रीमन्महालिङ्गकविविरचितं बृन्दावनाष्टकं समाप्तम्॥

॥ श्रीः ॥

# ॥ अथ कुवलयाञ्जलिः ॥

पादानतेऽपि दयिते धुरि याचमाने
मानावलेपमतिकर्कशमास्थितायाः ।
तस्योत्तमाङ्गशशिमूढमिव स्मरामः
पादाम्बुजं रभससङ्कुचदम्बिकायाः ॥ १ ॥

पुरा मन्ये शम्भोस्तनुसमविभागे प्रचलिते
त्वया तन्मूर्तिष्वप्यपहृतमिवार्धं कठिनया ।
यदिन्दुर्वक्त्राब्जे गगनमथ मध्ये यदमृतं
तवोमे बिम्बोष्ठे वपुषि च लसत्यस्थिररुचिः ॥ २ ॥

कामं जनो वदतु शङ्करमिन्दुमौलिं
भिक्षुः स को विबुधभोज्यमिमं ग्रहीतुम् ।
आचक्ष्महे किल वयं तमुपांशु खेलद्-
गङ्गाम्बुबिम्बितललाटतटं भवत्याः ॥ ३ ॥

अवियोगसहा किं नु जाह्नवीं शङ्कराहृताम् ।
कबरीकैतवेनाम्ब कालिन्दी तव सेवते ॥ ४ ॥

उद्यद्यामसृणयाऽथ दृशा भवत्या-
मङ्के निविश्य दयितस्य विलोकयन्त्याम् ।
भक्त्योपचित्य पदपङ्कजयोः शिवेऽह-
मामोदिनं कुवलयाञ्जलिमर्पयामि ॥ ५ ॥

कटाक्षाङ्कूरस्ते कुटिलगतिरारुण्यमधरो
रुषा स्पन्दन्धत्ते मयि विकटकल्माषकलिते ।
मृदुः कारुण्यं ते नुदति चरणौ नूपुररवैः
स्मितोद्भेदः सिञ्चन्नमृतरसमाश्वासयति माम् ॥ ६ ॥

पीयूषे कलशाम्बुधिः सुरगणैः सायासमुन्मथ्यते
पीड्यन्ते च विधुन्तुदेन चकितं चान्द्रीः कलाः पुष्कलाः ।
संसारोत्तरणे महौषधिमुमे त्वत्पादसंसेविनो
वीचीभङ्गिविसृत्वरां स्मितरुचिं स्वैरं निषेवामहे ॥ ७ ॥

आसक्ताधरपूर्वसान्ध्यमहसि व्याकोचमासेदुषी
प्रोन्मीलन्नयनाञ्चलैर्मधुकरैरभ्याशगैः प्रार्थिता ।
सोत्कण्ठं शितिकण्ठदृष्टसुषमा प्रेमानिलप्रेङ्खिता
मल्लीतल्लजमञ्जरी विजयते त्वन्मन्दहासच्छविः ॥ ८ ॥

कामं मन्मथदाहलब्धबिरुदः कामं यतीनां पुरो-
गण्यः काममकामिवेषरचनः शैलात्मजे शङ्करः ।
किं तु त्वन्नयनाञ्चलप्रणिहितप्रेङ्खत्कटाक्षच्छटा-
टोपोपस्कृतमन्दहाससुषमामुल्लङ्घितुं किं प्रभुः ॥ ९ ॥

मषीनीला नीलाम्बुदरुचिगलस्य प्रियतमे-
ऽप्रमेया दृष्टिस्ते हृदयगुडिकायां निपतिता ।
प्रवृद्धा निःसीमं झटिति बहिरुल्लङ्घ्य भुवना-
न्यमेया रोदोभ्यां विहरति हि साहित्यतटिनी ॥ १० ॥

॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३४] कलि ५०६२ पुष्य- मकर-कुम्भौ [सं ५-६
(1962-January-February)

# नादः उत नागः

दक्षिणभारते अस्ति वाद्यविशेषः, यस्य द्राविडभाषायां "नासनम्" इति अपभ्रंशपदेन अभिधानं क्रियते। अस्य अपभ्रंशपदस्य मूलभूतं साधुरूपं "नादस्वरम्" (संस्कृते "नादस्वरः") इत्येतदिति प्रायः सर्वैरङ्गीकृतं दृश्यते। शुद्धव्यवहारकारिणः तथैव व्यवहरन्ति।

'नासनम्' इत्यस्यान्ते नकारदर्शनानुरोधेन 'नादस्वनम्' (संस्कृते "नादस्वनः") इत्येवंरूपप्रकृतिकल्पनं युक्ततरं भाति।

कतिपयेभ्यो वर्षेभ्यः प्राक् मूलपदं प्रति महान् विमर्शः प्रवृत्त आसीत्। केचन "नागस्वरम्" इत्येतत् मूलपदमित्यातिष्ठन्त। अपरे "नादस्वरम्" इत्येतदिति। अत्र वादप्रतिवादानां महान् प्रबन्धः समाचारपत्रिकासु प्राकाश्यत। अन्ते "नादस्वर" पक्ष एव विजयमाप।

तत्र कारणमिदं प्रतीयते। नादशब्दः प्रसिद्धः। तथा तस्यार्थोऽपि। वाद्यात् नादः उत्पद्यते। अतः नादशब्दः तस्मिन् सङ्गतो भवति। नागशब्दस्य तु एवं साङ्गत्यं नास्तीति।

एवं नागशब्दस्य असाङ्गत्यं पश्यन्तः "नादस्वरम्" इत्यत्र 'नाद'-शब्देन 'स्वर' शब्दस्य कथं साङ्गत्यमितीदं पर्यालोचयितुं नाशक्नुवन्। प्रायः पर्यायशब्दौ हि इमौ। न हि "करपाणिः" इति उभयोः पर्यायशब्दयोः सह प्रयोगो भवति।

नाग इति सर्प उच्यते। तद्वत् दीर्घत्वात् नाग इति वाद्यस्य नामधेयं भवति। अतः सुसङ्गतो नागशब्दो वाद्ये। अस्मिन्नर्थे अयं शब्दः

चिरन्तनप्रयोगविषय इति मीमांसाभाष्ये शबरस्वामिप्रयोगादवगम्यते। स हि दशमाध्यायान्ते 'अनपायश्च कालस्य लक्षणं हि पुरोडाशौ' इति सूत्रविवरणावसरे

> यथा नागवेलायामागन्तव्यं, शङ्खवेलायामागन्तव्यं, पटहवेलायामागन्तव्यं इति। यस्मिन् ग्रामे न नागाः, न शङ्खाः, न पटहः तस्मिन्नपि स एव कालः। तत्र हि आगमनं क्रियते। एवमिहापि द्रष्टव्यम्।

इत्याह। अत्र नागशब्दो वाद्यविशेषवाचीत्यसन्दिग्धम्। अथ नागस्वरः नागस्वनः इत्यनयोर्मध्ये कतरः साधीयानिति चिन्तायां उत्तरपक्षपातिनो वयम्। स्वर इति ध्वनिविशेषवाची शब्दः। न तस्यापेक्षाऽत्र वर्तते। "सुखश्रवा मङ्गलतूर्यनिस्वनाः" इति महाकविप्रयोगदर्शनाच्च।

# ॥ वसुमान्-9 ॥

ललितावसुमतोर्विवाहः महता समारोहेण निरवर्तत। वरपक्षसम्बन्धिनो ये उपचाराः कर्तव्याः ते सर्वे वसुमन्मातुले मणिबाहौ (वीरबले) अक्रियन्त। सम्भृतसर्वसम्भारं पृथक् वासस्थानमकल्प्यत। पाकाय पाचका न्ययुज्यन्त। तत्तत्कर्मकरणाय कर्मकराश्च। विवाहमण्डपे तत्तत्समये सन्निधानाय रत्नकान्तः स्वयं तद्वासस्थानं गत्वा विनीतः प्रार्थ्य तं आनिनाय। गृहागतं स्वहस्तपरिकल्पिते आसने उपवेशयामास। उपविष्टाय चन्दनताम्बूलं स्वयं ददौ। तदा तदा कर्तव्यं तस्मै विज्ञाप्य तदभिप्रायानुरोधेन चकार। अन्ते सदस्ताम्बूलवितरणावसरे अग्रताम्बूलं तस्मै दापयामास। उत्थितं तं स्वयं नीत्वा वासस्थाने विसृज्य तदनुमतिं प्राप्य न्यवर्तत।

विवाहमण्डपे यत् कर्तव्यं होमादि तस्मिन् निश्शेषं निर्वृत्ते वसुमान् गत्वा किन्नाम यत् किमपि वस्तु अपेक्षितमिति मातुलानीं पृष्ट्वा वैवाहिकान् भक्ष्यविशेषान् विविधानि फलानि च स्वयमानीय दत्वा सादरमुपचचार।

सा अत्यन्तं प्रीता बभूव। वसुमतः सर्वप्रकारां समुन्नतिं यथा यथा अपश्यन्, तथा तथा अधोऽधो गच्छतः स्वकुटुम्बस्य उद्धाराय स एव शरणीकरणीय इति मतिं चकार। तस्मिन् अभ्यधिकं प्रेम आविष्कुर्वती सम्बभाषे। दिष्टचा त्वं लक्ष्मीकटाक्षाणां पूर्णं भाजनमसीति तमभ्यनन्दत्।

मणिबाहोः पुनः चित्तवृत्तिः अन्यथा बभूव। महत्यभ्युदये स्थितं वसुमन्तं पश्यतस्तस्य अल्पेतरा असूया अजायत। रत्नकान्तेन वसुमता च सादरं कृता उपचाराः न तस्य सन्तोषमजनयन्। प्रत्युत असूयामभ्यवर्धयन्। प्रीत्या विनयेन च तयोर्भाषमाणयोः अयं प्रायो मौनी अप्रसन्नमुखश्च अवर्तत। झटिति तथा अभिवृद्धा असूया यथा तस्मै तत्र अवस्थानमेव नारोचत। कण्टकोपरि स्थितमिव स आत्मानं मेने। सद्यः प्रस्थाय स्वगृहं गन्तुमैच्छत्।

तस्य गृहिणी तु अन्यन्मन्यमाना आसीत्। तत्रैव द्वित्राणि दिनानि स्थित्वा अवकाशलाभे वसुमता समालोच्य स्वपुत्र्याः पुत्रस्य च सन्मार्गे स्थापनं प्रति, बहुमानार्हजीवनपद्धतिसम्पत्तिं प्रति, किमपि कर्तव्यं मेने। एतत् प्रति किमपि कर्तुं वसुमान् शक्त इति, स्वेन प्रार्थितः अवश्यं किमपि करिष्यतीति च विशश्वास। अतः विवाहदिनरात्रावेव स्वगृहं प्रति प्रस्थानाय निर्बध्नन्तं भर्तारं अनुनयन्ती उवाच— "नाहं आर्यपुत्रस्य प्रतीपं किमपि वक्तुं कर्तुं वा इच्छामि। इदमवधेयमार्यपुत्रेण। विवाहयोग्यां

दशां प्राप्तवती वत्सा । अविलम्बेन सा कस्मैचित् देया । अन्यथा कुलस्य महान् कलङ्को भवेत् । वत्सश्च कुटुम्बभरणोचितं किमपि न करोति । भारवाहितां न प्रतिपद्यते । बालभाव एव वर्तते । क्षेत्रियरोगशतोपक्षीणसर्वसत्त्वे आर्यपुत्रे गृहान्तः सञ्चारेऽप्यक्षमे, कुटुम्बकार्यं कथं निर्वर्तताम् । अस्यां स्थितौ दैवादस्मान् अविस्मृतवता, अनुरागिणा, गुणशालिना च वसुमता सम्मन्त्र्य काञ्चन गतिं उपलब्धुमिच्छामि । अद्य सः अतिमात्रं व्यापृतः । द्वित्राणि दिनानि प्रतीक्ष्य, लब्धे अवकाशे तमुपगम्य भाषणं कार्यम् । अद्यैव चेत् प्रस्थाय गृहं गताः स्याम पुनस्तस्य दर्शनं तथा सुलभं न भवेत् । अतः आर्यपुत्रः प्रसादं कर्तुमर्हति । न खलु ममाप्यत्र चिरावस्थाने अभिरुचिः । कार्यगौरवं विचिन्त्य तु आर्यपुत्रे इदं विज्ञापनमिदानीं करोमि " इति ।

एवं सानुनयं उक्तवत्याः गृहिण्या नलिन्याः मणिबाहुः उत्तरं किमपि न ददौ । अथापि सा तदीयया मुखच्छायया स्वप्रार्थनां तेनाङ्गीकृतां जानती जहर्ष ।

गम्भीरप्रकृतिना उदारचरितेन च वसुमता सह असकृत् समागमे सति स्वपुत्रावपि तथाविधौ भवेतामिति मन्यमाना नलिनी पदे पदे कमपि व्याजं कृत्वा तौ वसुमत्सकाशं प्रेषयामास । अयं तस्या उद्देशः न मोघो बभूव ।

अभ्यागतौ तौ प्रीत्या प्रतिगृह्य अभिनन्द्य च वसुमान् समयोचितं निपुणं श्लक्ष्णं मधुरं च तत्तद् भाषमाणः तयोश्चित्तस्य आकर्षको बभूव । तत्सन्निधौ अवस्थानाय तौ स्पृहां चक्रतुः ।

आभ्यां सह वर्तमानः सः क्षणकालमपि न वृथा निनाय । विप्रकीर्णानि वस्तूनि तत्तत्स्थाने निदधौ । मलिनं आदर्शं ममार्ज ।

रिक्ता उत्सलेखनीः मष्या पूरयामास । सुहृद्भिः पठितक्षिप्तानि पुस्तकानि पुस्तकधानीषु यथास्थानं निदधौ । मध्ये मध्ये श्वशुरेण श्वश्र्वा वा आहूतः धावितकेन उपगम्य तेन तया वा कृतस्य प्रश्नस्य सविनयमुत्तरं दत्वा वा तदादिष्टं किमपि सपदि कृत्वा वा न्यवर्तत । कर्मकरेष्वागतेषु तदीयां वाचं सादरं निशम्य मधुरमाभाष्य यथार्हं तान् सन्तोष्य व्यसृजत् ।

अचिरवृत्तविवाहतया लज्जमानां कयाचिद् विवक्षया आगत्य द्वारात् बहिरेव स्थित्वा पश्यन्तीं ललितामवलोक्य "एह्येहि । अन्तरेहि । अलं लज्जित्वा । कौ इमौ मन्यसे ? साक्षान्मे मातुलस्यायं पुत्रः, इयं पुत्री । श्व एव अनयोः अनुरूपेण कन्यया वरेण च शोभनं भविष्यति । आवाभ्यां तदर्थं गन्तव्यम् । तद् युष्माकं मिथः गाढः परिचयो भवितुमर्हति ।" इति सस्मितः तेषां त्रयाणां स्मितं जनयंश्च अवदत् ।

वसुमत ईदृशीं चर्यां असकृत् सावधानं दृष्टवतोः तन्मातुलपुत्रयोर्मनसि गुणविषये शीलविषये च अपूर्वः कश्चन विवेकोऽजनि ।

# ॥ रघुवंशः ॥

## (प्रथमः सर्गः)

अथवा कृतवाग्द्वारे वंशेऽस्मिन् पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥ ४ ॥

अथवेति पक्षान्तरे । विषयस्य अतिमहत्त्वात् स्वस्यातिमन्दत्वाच्च सूर्यवंशवर्णनपरमहाकाव्यकरणं अशक्यमिति पूर्वं श्लोकद्वयेनावोचत् । तत् पूर्वपक्षीकृत्य सम्प्रति सिद्धान्तरूपं पक्षान्तरमाह । पूर्वसूरिभिः

प्राचीनैः प्राज्ञैः व्यासवाल्मीकिप्रभृतिभिः कृतद्वारे । कृतं रामायणमहाभारतादिवाग्रूपं द्वारं अन्तः प्रवेशावकाशः यस्य तस्मिन् । यद्वा अस्मदादीनामपि वाचः द्वारं प्रवृत्त्यवकाशः कृतः रामायणादिप्रणयनद्वारा सम्पादितः यस्मिन् तस्मिन् । अस्मिन् सूर्यप्रभवेवंशे मम गमनं प्रवेशः अस्ति सम्भवति । कस्मिन् कस्येव । वज्रेण कृतरन्ध्रे रत्ने सूत्रस्येव ।

सूर्यवंशवैभवे स्वकीये मन्दबुद्धित्वे च चिन्त्यमाने यद्यपि तद्वर्णनपरकाव्यकरणं सर्वथा अशक्यमिति भाति तथाऽपि प्राचीनैर्महामतिभिः रामायणादिग्रन्थप्रणयनेन "इदं तद्वैभवम् । एवं तद्वर्णनं कर्तव्य"मिति मार्गस्य प्रदर्शितत्वात् तदनुसारेण प्रवर्तमानस्य स्वस्य केनचित् प्रकारेण तद्वर्णनं शक्यमिति भावः ।

वाल्मीकिव्यासप्रभृतीनां प्राचां कवीनां वन्दनमिहाभिप्रेतम् । रत्नतुल्यः सूर्यवंशः । वज्रतुल्याः वाल्मीकिप्रभृतयः । तेन विषयभूतस्य वंशस्य, तद्वर्णनपरग्रन्थकृतां वाल्मीकिप्रभृतीनां पूर्वसूरीणां च उत्कर्षो व्यञ्जितः । सूत्रतुल्यमात्मानं कुर्वता स्वस्य निकर्षः सूचितः । अतोऽत्र वन्दनध्वनिः ।

मङ्गलरूपः प्रथमः श्लोकः । अहङ्कारपरिहारेण स्वनैच्यप्रकाशनपरौ द्वितीयतृतीयौ । अस्मिन् चतुर्थे श्लोके काव्यकरणमार्गदर्शिषु वाल्मीकिप्रभृतिषु कृतज्ञताप्रकाशनं तद्वन्दनं चाभिप्रेतम् । एते प्रधानप्रतिपाद्यार्थाः । अर्थात् ग्रन्थकरणप्रवृत्तिः, तस्य सूर्यवंशविषयकत्वं, महाकाव्यरूपत्वं, रामायणाद्यनुसारित्वं च एतैश्चतुर्भिः श्लोकैः क्रमेण ज्ञाप्यन्ते ।

ईश्वरानुग्रहसत्त्वेऽपि स्वबुद्धिमात्रमाश्रित्य इष्टसम्पादनमशक्यमिति पूर्वं विषण्णोऽभवत् । अथ आचार्यसकाशादधिगतया शिक्षया शक्यमेवेति धैर्यमालम्बते ।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्य उत्तमो राजा)

वि. वि. श्री.

## द्वितीयेऽङ्के तृतीयं प्रेक्षणकम्

[यवनिकाऽपनीयते। आस्थानशालायां अपराह्णे रामः सीता च सिंहासने उपविष्टौ स्तः। सुमन्त्रप्रभृतयो मन्त्रिणः, अन्ये राजपुरुषाः, पौराश्च यथार्हं आसनस्थाः।]

रामः— किन्नाम यःकोऽपि अस्मद्दर्शनकाङ्क्षी कार्यार्थी वर्तते ?

सुमन्त्रः— महाराजः इमं कालं व्यवहारदर्शनाय परिकल्पितवान्। परं तु व्यवहारार्थी पुरुषः एकोऽपि नास्तीति भाति, यस्मात् दिनमनु दिनं एकमपि व्यवहारं विना शून्यं याति।

रामः— व्यवहारविरहो न अनुशोचनार्हो विषयः। तद्विरहेऽपि तदर्थं कालपरिकल्पनं तु अवश्यं कार्यम्। व्यवहारदर्शनं अस्मत्कार्ये प्रधानांशः।

[ततः अप्रतीक्षितं प्रविशति भास्करगुप्तो नाम वैश्यो वणिक्। सः सिंहासनमुपसृत्य रामं प्रणम्य भाषणाय तदनुज्ञां प्रतिपालयन् तिष्ठति।]

सीता— (रामं प्रति) तत्र यस्तिष्ठति स कार्यार्थीति भाति।

रामः— (भास्करगुप्तं प्रति) भास्करगुप्त! यदि ते अत्र आगमनं किञ्चित् प्रयोजनमुद्दिश्य तर्हि ब्रूहि, किं तत् ?

भास्करगुप्तः— महाराज! अद्य प्रातः मम गृहिणी महति रजतपात्रे अन्नं निधाय शिशुं प्राशयन्ती अवर्तत। तत् पात्रं गृहस्यान्तः अपवरके विमुच्य किमप्याहर्तुं महानसमगच्छत्। प्रतिनिवृत्य सा यदा अद्राक्षीत् तदा तत् पात्रं तत्र न दृश्यते स्म। नूनं केनापि चोरितम्। महाराजे इदं निवेदयितुं अहमागतोऽस्मि। न महार्घं वस्तु नष्टमिति मत्वा,

अपि तु रामराज्येऽपि एवं चौर्यं प्रवर्तत इति विस्मयेन। तथाविधं हि रामराज्यं, यत्र न चोराः श्रूयन्ते, न चौर्याणि; यत्र च वीथीषु पतिता वित्तभस्त्रिकाऽपि सुस्थिता भवति।

रामः– वस्तुतः विस्मितः विषण्णश्चाहमस्मि। अस्ति ते निश्चयः भवद्गृहिणी कुत्रचित् तत् न निक्षिप्तवतीति, अथवा शिशुः क्वापि क्षिप्तवानिति?

भास्कर– अस्ति मे निश्चयः, महाराज। गृहे सर्वस्मिन् कोणे, सर्वस्मिन् छिद्रे अन्विष्टवानभूवम्। नोपलब्धवानस्मि।

रामः– (सुमन्त्रं प्रति) किमेतत् सुमन्त्र? मम मतिरभूत्– ईदृशं किमपि अयोध्यायां न वर्तत इति। नास्ति यः कोऽपि तादृशः पुरुषः य एवमयोग्यः स्यात्, यो वा तथा रिक्तः स्यात् यथा चौर्येण वस्तु सम्पाद्यं स्यात्।

सुमन्त्रः– अद्भुतमेवेदं महाराज। सम्पूर्णं विचारमत्र वर्तयिष्यामि।

रामः– (भास्करगुप्तं प्रति) किं त्वं दृढं प्रत्येषि चोरितं तदिति? को हेतुः तथा ते निश्चये? किं ते कञ्चित् प्रति सन्देहोऽस्ति?

भास्कर– न महाराज। न मे यं कमपि प्रति सन्देहोऽस्ति।

रामः– अद्भुतमिदं दृश्यते। अस्तु। सौम्य, चोरोपलम्भाय चोरितवस्तुप्रत्याहरणाय च यथासमुदाचारं मन्त्रिणे दिनत्रयावकाशं दद्मः। त्रिभिर्दिनैः यदि तत् प्रत्याहृतं न भवति तस्य अर्घं ते अस्मत्कोशगृहात् दापयिष्यामि। तद् ब्रवीतु भवान्, कियान् तस्य अर्घः?

भास्कर– महाराज! तस्य अर्घः पञ्चविंशतिः रजतटङ्काः। अपि तु नाहं वित्तमपेक्षे। नाहं दुर्गतः। महाराजशासनारम्भात् प्रभृति अस्मिन् राज्ये ईदृशं किमपि न वृत्तम्। अतः महाराजे एतन्निवेदनं मम धर्म इति मम मतिरभूत्।

मन्त्री धनपालः– (रामं प्रति) यदि चोरहृतानां वस्तूनां कृते तदर्घप्रदानं तत्स्वामिभ्यः महाराज आदिशति, चौर्यव्यवहाराः प्रत्यहं वर्धेरन्।

रामः– न तथा किमपि। नाहं तथा मन्ये। विश्वासकरणं आर्जवं जनयति। किञ्च चौर्यस्य निरोधो वा वृत्तस्य तस्य उपलम्भो वा यदि न क्रियते राज्यपालस्य तत्र वाच्यता। (स तत्रापराधी)।

(रजतपात्रहस्तः वृद्धो ब्राह्मणः कश्चित् प्रविशति)

रामः— अत्र पश्यत। नष्टतया अद्य निवेदितं यत् रजतभाजनं, साक्षात् तदेवेदं यदयं ब्राह्मण आहरति। (समीपमागते ब्राह्मणे) भो ब्राह्मणोत्तम! कच्चित् कार्यार्थी भवानागतः ?

हरिहरशास्त्री— आम, महाराज। अद्य माध्याह्निकाय सरयूं गतः बालवानरं कञ्चित् वृक्षच्छाये उपविश्य इदं रजतभाजनं वहन्तं, तस्मात् अन्नमादाय भुञ्जानं अद्राक्षम्। विस्मयो मे अभूत् कपिं राजतात् पात्रात् आदाय अन्नमश्नन्तं पश्यतः। रामराज्ये किं कीशानामपि रजतमयं भोजनपात्रमिति चित्रीयते स्म मम चेतः।

राम— ततः!

हरिहर— सन्निहिते मयि स झटिति अपधावति स्म पात्रं मुञ्चन्। यदि वानरस्य स्वमिदं पात्रं तर्हि सः अनुपदमागत्य ग्रहीष्यतीति मन्यमानः स्नानादिकं कृत्वा कञ्चित् कालं प्रतीक्षामकार्षम्। पुनः स न दृष्टः। अतः यस्य कस्यापि पात्रमपहृत्य अयं परागत इति निरचैषम्। सरयूतीरवासिनः कांश्चिदप्राक्षम्— किं तेषु कश्चित् नष्टरजतभाजन इति। ते सर्वे अवोचन् नेति। ततोऽहं गृहान् गत्वा भुक्त्वा विचिन्त्य महाराजाय इदमर्पणीयमिति मतिमकार्षम्।

# पुस्तकपरामर्शः

भारतम् अद्यतनं श्वस्तनं च। आजाद्-स्मारकभाषणमाला-1959. (नेषनल् बुक् ट्रस्ट् ग्रन्थः)। श्री जवाहर्लाल् नेह्रु-कृतम्। श्री वे. राघवेण संस्कृतीकृतम्। The Publication Division, Ministry of Information and Broadcasting, Old Secretariat, Delhi–6. मूल्यम् 75 नव्यपैसाः।

अस्मत्समष्टिशासनप्रधानमन्त्री श्री जवाहर्लाल् नेह्रु सर्वतोमुखप्रज्ञः। धीमान्। राष्ट्रतन्त्रनिपुणः। ग्रन्थकारः। वाग्मी। समष्टि-

शासने भूतपूर्वस्य विद्यामन्त्रिणः कीर्तिशेषतां गतस्य स्मरणसत्कार-मुद्दिश्य कृतसंविधानः श्री नेहू-अनेन कृतः 'भारतं अद्यतनं श्वस्तनं च' इत्येतद्विषयकः उपन्यासः ग्रन्थरूपेण प्राकाश्यत । तस्यायं संस्कृतानुवादः द्राविडप्रदेशे विश्वविद्यालय-संस्कृतप्राध्यापकेन श्री वे. राघवेण विरचितः ।

श्री नेहू-महाशयः अद्य लोकविख्यातो महापुरुषः । स्वातन्त्र्य-लाभात् प्रभृति देशशासनधुरां बिभ्रत् सर्वसम्पत्समृद्धिमतः अभिनवस्य भारतदेशस्य निर्माणे अभिनिविष्टमनाः बहुधा परिश्राम्यति । अत इम-मेव विषयमवलम्ब्य तमुपन्यासं कर्तुं तस्य मतिरभवदिति युक्तमेतत् ।

श्री वे. राघवः मद्रविश्वविद्यालयस्थोऽपि, संस्कृतसाहित्ये सङ्गीतादि-कलासु च कृतगाढपरिचयत्वात् एतदभिवृद्धिलक्ष्यासु देशे तत्र तत्र क्रिय-माणासु प्रायः सर्वासु प्रवृत्तिषु लम्भितान्वयः कृत्स्नेऽस्मद्देशे संस्कृत-सम्बन्धिषु विचारेषु निर्णयेषु च अभ्यन्तरीभूतः प्रधानपुरुषः संवृत्तः । अचिरात् राष्ट्रपतिना पद्मभूषणबिरुदप्रदानेन सम्भावितः । सोऽयं आङ्गलभाषामयस्य नेहूभाषितस्यास्य संस्कृतेन अनुवादं यदकरोत् तत् अत्यन्तमभिनन्दनीयम् ।

श्री नेहू स्वस्य नास्तिक्यं स्वयं घोषयति । वेदप्रभृतिशास्त्रानुसारि प्राचीनं सर्वं विद्वेष्टि । विध्वस्तसर्वजातिभेदं एकरूपं जनसमूहं कर्तु-मिच्छति । अशनाच्छादनापर्याप्तिरिदानीं वर्तते । तामपोह्य तत्पर्याप्ति-मती स्थितिः सम्पादनीया, इति परममुद्देश्यं आकलयति । धनिको दरिद्र इति भिदाप्रयुक्तौ अत्यन्तोत्कर्षापकर्षौ समूलमुच्छेत्तुं व्यवस्यति ।

एवंविधा तस्य बुद्धिप्रसरपद्धतिः अध्यवसायपरम्परा च अस्मिन् निबन्धे सुप्रतिफलिते दृश्येते । सनातनधर्ममार्गस्य अत्यन्तप्रतीपगामी श्री नेहू । तस्य ये सिद्धान्ताः, ये उद्देशाः, तान् सर्वान् संस्कृतविदः सना-तनधर्मसङ्गिनश्च महान्तः सर्वे ज्ञातुमर्हन्ति । श्री राघवविरचितं इमं संस्कृतानुवादं अनुवाच्य ते तान् ज्ञातुं शक्नुवन्ति । तदिदं तज्ज्ञान-साधनं परिकल्प्य तेषां बहु उपकृतवान् भवति श्री राघवः ।

नवीनानामभिप्रायाणां संस्कृतवाचा प्रकाशनं नाम अतिदुष्करमिदं कर्म । श्री राघवः व्युत्पन्नैः शक्तैः उचितैः सुसन्दब्धैः पदैः इममनुवादं निबद्धवान् ।

आङ्ग्लपदाभिधेयार्थविशेषपरतया प्रयुक्तानां केषाञ्चित् पदानां विवक्षिततत्तदर्थावगमे नूनं बहूनां क्लेशो भविष्यति । तत्र तत्र तत्तत्पदमनु अथवा पृथगनुबन्धरूपेण तेषां आङ्ग्लपदैः विवरणं कृतमभविष्यच्चेत् स क्लेशो नाभविष्यत् ।

# प्रकृतिभेदः

वासुः— भानो ! सङ्कलय अस्मदीयानि वस्तूनि । प्रस्थातव्यम् ।

भानुः— कुत्र ?

वा— ग्रामाय ।

भा— कदा ?

वा— अद्यैव ।

भा— कुत इयं त्वरा ?

वा— "इयं त्वरा ?" यदि इयं त्वरा किं नाम तत् यन्मान्द्यमित्युच्यते ? कति दिनान्यासन् अत्र आगतवतोरावयोः ?

भा— दशाधिकान्यासन् । ततः किम् ? श्वः भगवत उत्सवारम्भ इति वदन्ति । रथे भगवन्तं सेवित्वा प्रतिष्ठेवहि । ग्रामं गत्वा किमिदानीं कर्तव्यम् ?

वा— ग्रामे किमपि कर्तव्यमस्तु मा वा । परगृहे कियन्ति दिनानि वस्तव्यम् ?

भा— (सहासं) आः । इदं नु कारणं तव प्रस्थानसंरम्भस्य ?

वा— किमिदं न पर्याप्तं कारणं सद्यः प्रस्थानस्य ?

भा— किं नाम गृहिणः किमप्यवोचन् आवयोरत्र वासं प्रति ?

वा— किं यावद् वाचा वदन्ति तावदत्र आवाभ्यां स्थातव्यम् ?

TIRUPATI

भा— किं सूचनमकार्षुः ?

वा— न। नाकार्षुः।

भा— तर्हि कुतस्ते व्यथा ?

वा— साधवः दाक्षिण्यात् किमपि न वदन्ति। नापि सूचयन्ति। बुद्धिमद्भिः स्वयमिदं ज्ञातव्यम्— आगन्तवो यदि दीर्घकालं वसन्ति, तेन गृहिणां कियती पीडा भवतीति।

भा— अस्मिन् क्षेत्रे भगवत उत्सवं सकृदपि न सेवितवानस्मि। अतः तदवधि स्थित्वा गन्तव्यमिति मे मतिः।

वा— भगवदुत्सवसेवनादपि परोपद्रववर्जनं प्रधानमिति मेऽध्यवसायः।

भा— तर्हि त्वं प्रतिष्ठस्व। अहं स्थित्वा आगमिष्यामि।

वा— ओम्। त्वं तथा कुरु। अयमहं प्रस्थितः।

## ॥ श्री लक्ष्मीपञ्चाशत् ॥

विद्याभूषणं, चिलुक्कूर् मा॰ वेङ्कटराघवाचार्यः, शिरोमणिः

त्वत्पादकान्तिविजितः पद्मसमूहः पराभवं त्वत्तः।
प्राप्य चकाराकल्पं पङ्कं प्रापाथ पङ्कजाभिख्याम्॥ ३० ॥

निगमाख्यनक्रमल्लस्त्वद्गुणसिन्धोस्तितीर्षयोद्युक्तः।
नैव ययौ पारं मे नीचः श्वाऽहं कथं तरेयं तम्॥ ३१ ॥

त्वन्मुखपद्मप्रभया विजितश्चन्द्रः पराजयाङ्कं मे।
न्यदधात्स्वमुखे पङ्कं पृषदङ्क इति प्रथामतः प्राप॥ ३२ ॥

त्वां स्तोतुमुद्यता ये पापा अपि ते न यान्ति किं श्रेयः।
श्वानः पीत्वा गाङ्गं धूतपिपासाः पयो न किं दृष्टाः॥ ३३ ॥

Registered No M 2300.

Book XXXIV ॥ श्रीः ॥ Nos. 7-8

# उद्यान·पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३४] कलि ५०६३ प्लव – मीन–शुभकृत् ६४ मेषौ [सं ७–८

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

March & April 1962.

In case you have not received the previous number please inform the Editor or Publisher immediately.

For the rate of subscription please see inside

# UDYANA PATRIKA.


Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।
२ ग्राहकीबुभूषद्भिरियया प्रथममेव मूल्यं प्रेषणीयम् ।
३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।
४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः: *Mimamsarnava Mimamsakesari,*
*Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.


## विषयाः ॥


1 कुवलयाञ्जलिः ।
2 श्री नटेशनवार्यास्तवः ।
3 श्री मीनाक्षीशतकम् ।
4 सदातनम् ।
5 श्री कृष्णस्तवः ।
6 रामराज्यम् ।
7 रघुवंशः ।
8 वसुमान्-10
9 श्री लक्ष्मीपञ्चाशत् ।

श्री गीतार्थदीपः । ३३३-३३६
The Githartha Sangraha—37-40.

KENDRIYA SANSKRIT VIDYAPEETHA TIRUPATI. LIBRARY. ४१

ज्वालापिङ्गजटासटः कचभरे कालाम्बुदाडम्बरा
श्यामा काममनोधृतिर्विधूतवैमुख्यश्चिरं संसृतौ ।
माया केवलचिन्मयोऽपि दधतो दाम्पत्यमत्यद्भुतं
सेयं सङ्घटना परस्परतपस्सम्पादिता हन्त भोः ॥ ११ ॥

उत्के विलक्षजडपाणिकृतस्रजोऽस्याः
किञ्चित्स्मितच्छविविमिश्रकटाक्षपातम् ।
मालाधियोरसि शिवे द्रुतमीक्षमाणे
वध्वाः शुभा जयति रीतिरिमां सृजन्त्याः ॥ १२ ॥

दिष्ट्या मयि क्षणमहो करुणाप्रणुन्ना-
न्मातः कटाक्षजलदात्पिबति प्रसक्ताम् ।
पीयूषसन्ततिझरीं हृदयं भवार्त-
मावृन्तविश्लथनमादरसंप्रफुल्लम् ॥ १३ ॥

महानाश्वासो मे खरमिहिरसन्तप्तशिरसो
मरुक्षेत्रे यात्रापरिकरभृतः संसृतिमये ।
समुद्भिन्नस्वेदव्यतिकरवतः क्लिष्टवपुषः
परिस्तीर्णः स्निग्धाम्बुद इव दृगन्तस्तव शिवे ॥ १४ ॥

आमोदिनो भृतमरन्दकणान् सुजातान्
धन्येऽथ चिन्वति शुभान् स्तबकान् सुमानाम् ।
सारस्वतोपवनतस्त्वहमाहरामि
म्लानानि शुष्कमृदितानि सुमानि देव्यै ॥ १५ ॥

प्रह्लादनं सुवदनामृतदीधितिं ते
प्रम्लानरोचिरभिवीक्ष्य शशाङ्कपोतः ।
नूनं तपस्तपति जह्नुसुतातटेषु
नो चेत्कुतोऽस्य वसतिर्गिरिशोत्तमाङ्गे ॥ १६ ॥

वक्षोजकुम्भयुगबन्धुरकोमलाङ्ग्या
उज्जीव्य काममभिषेक्तुमिवोद्यतायाः ।
कन्दर्पजिष्णुरभवद्धि कटाक्षमाला-
हेलागृहीतहृदयो वरिवस्यकस्ते ॥ १७ ॥

अम्ब त्वमादिपुरुषस्य विनोदशाला
प्रज्ञाविकाससहकारिकटाक्षमाला ।
मायाप्रपञ्चपरिकुञ्चनचुञ्चुलीला
त्वत्पादपङ्कजजुषामभयोक्तिशीला ॥ १८ ॥

विद्योतितत्रिभुवने भुवनेश्वरि त्वा-
मद्यावधि स्मृतिबहिष्कृतरूपधेयाम् ।
सद्यः समेतुमलमस्मि न लज्जयैव
खिद्यन्मनास्तव कृपालवलाभहेतोः ॥ १९ ॥

विंशतिप्रायवयसा मया देवीपदाब्जयोः ।
कृपामर्थयमानेन कृतः कुवलयाञ्जलिः ॥ २० ॥

॥ इति श्रीमन्महालिङ्गकविविरचितः कुवलयाञ्जलिः समाप्तः ॥

ॐ

# श्रीनटेशनवार्यास्तवः

किञ्चिन्न्यञ्चितदक्षिणजानुतिरश्चीनलम्बलम्भनया ।
उल्लास्य वामचरणं देवं सेवानिदेशिनं वन्दे ॥ १ ॥
जन्माध्वनि यश्चरतामन्तकचिन्तानितान्तचकितानाम् ।
मुनितनयायुष्यविधेर्व्युदस्तमङ्घ्रिं निदर्शयति ॥ २ ॥
अभयाख्यहस्तमुद्राप्रदर्शिनोऽन्यानतीत्य सुरमुख्यान् ।
आमृत्योरभयव्रतपताकिका येन धूयते पादः ॥ ३ ॥
उच्छलति गाङ्गवारिणि विलम्बमाने च मुकुटशशिशकले ।
विश्लिष्यति फणिवलये विगलितवेद्यान्तरो नरीनर्ति ॥ ४ ॥
हाटकसभाप्रवेशः पतञ्जलिव्याघ्रपान्मुखाः सभ्याः ।
नाट्यं प्रयोज्यवस्तु व्यतिकर एष हि न किं प्रमोदाय ॥ ५ ॥
बहुभूमिकप्रपञ्चस्वकृतिप्रेक्षामहे प्रनृत्तस्त्वम् ।
त्वामिति विभाव्य वयमपि संसाररसेन नन्दामः ॥ ६ ॥
नटति त्वयि नटति जगत् त्वयि विश्राम्यत्यपीदमुपरमति ।
त्वामनुचैतन्यमिदं वाचश्चेमाः प्रवल्गन्ति ॥ ७ ॥
रङ्गक्रिया तवाङ्गी त्रिभुवनयात्रैकसूत्रधारस्य ।
अङ्गं तत्र कृतिर्मे जीवनचर्यांजुषः प्रपञ्चेऽस्मिन् ॥ ८ ॥
ललितपदन्याससुखाः संवित्प्राणास्तरङ्गिताकूताः ।
नृत्यारम्भा इव ते कृत्यारम्भाः प्रथन्तां मे ॥ ९ ॥
॥ इति श्रीमन्महालिङ्गकविविरचितः श्रीनटेशनवार्यास्तवः समाप्तः ॥

श्रीः

श्री मीनाक्षीसुन्दरेश्वराभ्यां नमः

# श्री मीनाक्षीशतकम्

मीनाक्षि मातरलसेऽप्यनुकम्पां मयि विधातुमुचितं ते ।
यस्य मम पूर्वपुरुषेष्वनुप्रविष्टा त्वमंशेन ॥ १ ॥

तत्तिष्ठतु यज्जगतां माता त्वमसीति वर्ण्यसे विबुधैः ।
अन्वयपितामही नः प्रार्थितसुलभा भवस्येव ॥ २ ॥

त्वत्परिवर्धितपूर्वा वंशलतेयं तथा हि विचकास ।
अद्यापि येन सौरभदन्तुरहरिदन्तरं भुवनम् ॥ ३ ॥

अर्धे वपुषि पुरारेर्दर्शितघटना सकृत्स्वपत्युरपि ।
करुणापदे कुलेऽस्मिन् स्वयमेवावतारः शश्वत् ॥ ४ ॥

अप्पय्यदीक्षितो नः स जयति यस्मिन् निजांशमभिदधता ।
दाम्पत्येऽपि सुविहिते तव कलहो जायते भर्त्रा ॥ ५ ॥

त्वच्चरणमार्जनाम्भोविवर्तभूतप्रगल्भवाग्वर्षः ।
श्रीनीलकण्ठसूरिर्जीयादाचन्द्रतारार्कम् ॥ ६ ॥

त्वदपाङ्गगोचरेऽस्मिन्नन्वयजलधौ पुराऽथ नाभूवन् ।
कति कति कल्पकतरवो रत्नानि सुधांशवो वाऽपि ॥ ७ ॥

पूर्वं कृतादरेति त्वमर्थ्यसे धृष्टमेवमगुणेन ।
दासापत्ये प्रीतिर्निसर्गभूता हि भर्तृणाम् ॥ ८ ॥

श्रीनीलकण्ठमखिनः स्तुवतः कर्पूरदग्धमक्षियुगम् ।
सद्यः प्रसाद्य भवती दर्शनमपि चानुजग्राह ॥ ९ ॥

# ॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३४] कलि ५०६३ प्लव- मीन शुभकृत् ६४ मेषौ [सं ७-८

(1962-March-April)


## सदातनम्

राजराज्यकालो वृत्तः। प्रजाराज्यकाल आगतः। अयमिदानीं वर्तते। वर्तिष्यत इति च भाति।

किं राजराज्यं श्रेयः उत प्रजाराज्यम् ?

अस्य प्रश्नस्य सर्वहृदयङ्गमं उत्तरं दुर्वचम्। अथापि इदं वक्तुं शक्यम्।

"प्रजाभ्यः योगक्षेमक्लृप्तौ तदपि साधु, इदमपि। तद्विरहे तदपि न साधु, इदमपि न।"

किन्तु अस्मदीयशास्त्रग्रन्थानां पूर्वपुरुषचरितानां च परिशीलने राजविहीनं राष्ट्रं किञ्चित् कदाचिदासीदिति न ज्ञायते।

देवालये देव इव राष्ट्रे राजा अवश्यं भवितुमर्हतीति शास्त्राणां प्राचां प्राज्ञानां च दृढोऽभिप्रायः।

राजा यदि दुष्टो भवति तेन च प्रजानां क्लेशो भवति तर्हि तस्य गुणाधाने वा तदसम्भवे तं सिंहासनादवरोप्य अन्यस्य योग्यस्य तत्र स्थापने वा प्रजानां अस्ति पूर्णोऽधिकारः। अयमधिकारः उचितेषु अवसरेषु प्राक्काले जनैः अनुष्ठानपर्यवसायीकृत इति च जानीमः।

साधवस्तु राजानः तथा प्रजासु अवर्तन्त, तथा शासनमकार्षुः यथा किं राज्ञ इदं राज्यं अथवा प्रजानामिति चिन्ता नैवोदियाय। अयं विभागोऽत्यन्तं निरवकाश आसीत्। सर्वेषां राज्यं, राज्ञां च जनानां च। कुतो विभागः। धर्मराज्यम्। अतः सर्वराज्यम्।

इदानीमपि इयं स्थितिर्यथा सम्पद्येत तथा धीमद्भिः प्रयतनीयम्।

भिन्नभिन्नाः कक्ष्याः सन्ति। एकैका कक्ष्या एकैकविधं जनसमूहं, एकैकविधां जीवनपद्धतिं एकैकविधं राष्ट्रशासनप्रकारं निर्मातुमिच्छति। तदर्थं इतराः कक्ष्याः पराजित्य स्वयं शासितृपदमाक्रमितुमिच्छति, तीव्रं प्रयतते। अनेन हेतुना स्पर्धाः कलहाः क्षोभाश्च पदे पदे भवन्ति।

अस्मदीया नागरिकता चिरन्तनी। सर्वविधा व्यवस्थाः कृताः सन्ति। तासु कालानुरोधेन कासाञ्चित् यद्यपि विपर्यासोऽवर्जनीयः, तथाऽपि विपर्यासानर्हाः सदातन्यः बह्व्यः सन्ति। तासामेव सनातनधर्माभिधानम्। सम्यक् तदवगमे कक्ष्याभेदा विलयं गच्छेयुः। सर्वे शान्तिं भजेयुः। राज्यपरिपालनं साधु प्रवर्तेत।

# श्री कृष्णस्तवः

(Sri. Kochanujan Rajah, M. A., B. L.)

अज्ञानध्वान्तविध्वंसकारिणे गिरिधारिणे।
महेन्द्रगर्वसंहर्त्रे गोविन्दाय नमो नमः॥ १ ॥

कालियाहिफणारत्नभूषितोऽङ्घ्रिर्निवेश्यताम्।
क्वणन्नूपुरमस्माकं मूर्धस्वपि महाप्रभो॥ २ ॥

गोकण्डूयनलोलोऽपि मद्गात्रं शिथिलं सकृत्।
त्वातदोर्भ्यां महार्हाभ्यां प्रसीदाश्लिष्य साम्प्रतम्॥ ३ ॥

रासक्रीडासु ललितो वेणुनादो यथा तथा।
निसर्गरम्या त्वद्वक्त्राद् गीता निर्गलिताऽच्युत॥ ४ ॥

पश्चादुपनिषद्धेनूर्दोग्धासीति निरूपयन्।
नन्दगोपगृहे बाल्यमनैषीरिति मन्महे॥ ५ ॥

परप्रेमस्वरूप त्वत्पादरेणुषु मज्जनम्।
लभ्यं कदा नु मे गोपीकान्त बृन्दावनान्तरे॥ ६ ॥

# रामराज्यम् ॥

(उत्तमस्य राज्यस्य उत्तमो राजा)

वि. वि. श्री.

## द्वितीयेऽङ्के तृतीयं प्रेक्षणकम्

रामः— (सस्मितम्) ब्राह्मण, धनिको भवान् ?

शास्त्री— न, महाराज। स्वजात्युचिता याच्ना मे वृत्तिः। तदा तदा वैदिकेषु कर्मसु वर्तमानेषु अन्वितो भवामि। कथं धनिको भवेयम्।

रामः— अपि नाम राजतं भाजनं किमपि स्वकीयं भवद्गृहे वर्तते ?

शास्त्री— न, महाराज। स्वाप्निकमपि तन्मे दुर्लभम्।

रामः— इदं रजतभाजनं मदीयमिति न कोऽपि ब्रवीति। भवानिदं कुतो न गृह्णाति ? कस्तव प्रतिबन्धः ? न भवानिदं अचूचुरत्।

शास्त्री— तत्सत्यं, महाराज। अयमिति विशिष्य अज्ञायमानत्वेऽपि नूनमस्य केनचित् स्वामिना भवितव्यम्। न खलु अस्वामिकं इदं भवितुमर्हति। तस्येदं स्वमिति मे प्रत्ययः। यद्यप्यस्वामिकमेतत्, अत एव न कश्चिद् गृह्णाति, तथाऽपि महाराजस्य स्वं भवितुर्हति, नान्यस्य कस्यचित्। अत इदमत्र आनैषम्।

रामः— (वैश्यं प्रति) भो वैश्यवर्य, चोरहृतमिति यदद्य भवता निवेदितं किं तदेवेदं राजतं भाजनमिति अवलोकयतु भवान्।

भास्कर— तदेवेदं महाराज। मदीयमिदम्। नाहमज्ञासिषं कपयोऽपि चौर्यमाचरन्तीति।

रामः— न पात्रतृष्णया कीश इदमहर्षीत्, अपि तु अस्मिन् स्थितस्य अन्नस्य हेतोः। नूनं स कीशोऽमंस्त अन्नं क्षुधितानां सर्वेषां साधारणं स्वमिति।

(ब्राह्मणं प्रति) ब्राह्मणोत्तम, इदं भाजनं भवता अत्र आनायीति वयं सन्तुष्टाः स्मः। इदं अस्य श्रेष्ठिनः स्वमिति ज्ञायते। तस्मा इदमर्पयतु भवान्।

शास्त्री— यथा महाराज आदिशति।

[इत्थमुक्त्वा पात्रं भास्करगुप्ताय अर्पयितुमीहते। स तु प्रतिग्रहाय हस्तं अप्रसारयन् तूष्णीं तिष्ठति)

भास्कर— क्षमतां मां महाराजः। चौर्यं न वृत्तमिति सम्प्रति ज्ञायते। यथा वातेन वस्त्रखण्डोऽपनीतः स्यात् तथा वानरेण इदमपहियते स्म विनैव चौर्यबुद्धिम्। तस्योपलम्भः अनेन द्विजवरेण अकारि। अस्य श्रमस्य कृते अस्मै प्रत्युपकारं कमप्यकृत्वा पात्रग्रहणं मे न युक्तम्। पात्रमेवेदं प्रीत्या श्रद्धया च अस्मै श्रोत्रियाय अहं ददामि।

रामः— (ब्राह्मणं प्रति) हन्त ब्राह्मणोत्तम, उदारोऽयं वैश्यप्रभुः इदं भाजनमेव भवते दातुमिच्छति। इदं प्रतिगृह्य स्वकीयं कृत्वा स्वगृहं यातु भवान्।

शास्त्री— न न, महाराज। नाहमेतत् प्रतिग्रहीष्यामि। नेदं मम। रजतभाजनेन किमहं करिष्यामि। न मे तेन किञ्चित् प्रयोजनम्। किमहं राजतं भाजनं हस्ते धारयन् अयोध्यावीथीषु याच्ञां कुर्याम्?

भास्कर— यद्यत्र भवान् पात्रं नेच्छति तर्हि तदर्घं पञ्चविंशतिं रजतटङ्कान् गृह्णातु। (टङ्कानादातुं वित्तभस्त्रिकां गृह्णाति)

शास्त्री— न न। इदमपि नाहं ग्रहीष्यामि। नाहं वित्तं स्पृशेयम्। तन्मे व्रतम्। वित्तेन किं साध्यं ब्राह्मणस्य। तृष्णावर्धकः पिशाचः सः। कामस्योदयः ब्राह्मण्यस्यास्तमयो भवति। न। तन्मे मा भूत्।

रामः— विप्रवर्य, आश्चर्यावहं भवतो वृत्तम्। पारमार्थिकं श्रोत्रियभावं भवतः अभिनन्दामि। यदि न वित्तं, अन्यत् किमपि उपयोगार्हं वस्तु किं न प्रतिगृह्णाति भवान्?

शास्त्री— (क्षणं ध्यात्वा) तथा, महाराज। पश्यति अत्र भवान् इदं मे शीर्णं पुराणं वसनम्। यद्ययं प्रभुः एकं वस्त्रं मे दद्यात् तस्य ग्रहणे न मे अनभिमतिः। सज्जनोऽयं दृश्यते। सज्जनेभ्यः प्रतिग्रहः कार्यः।

रामः— (कञ्चिदमात्यं प्रति) अमात्य, अस्मद्भाण्डागारात् समीचीनं वस्त्रयुगलमानीय अस्मै द्विजवराय प्रयच्छ।

(अमात्यो जिगमिषति)

भास्कर— (सरभसमुत्तिष्ठन्) न न महाराज। अस्मै ब्राह्मणोत्तमाय वस्त्रयुगदानं मया कर्तव्यम्। ममायं धर्मः। इममवसरं मे न लोपयितुमर्हति महाराजः।

रामः— भवानपि एकं वस्त्रयुगं प्रेषयतु। राष्ट्रं पालयतो राज्ञः इदं

प्रथमकृत्यं यत् राष्ट्रे पुमान् स्त्री शिशुः एकैकोऽपि अपेक्षितं अशनाच्छादनं यथा लभेत तथा संविधानम्। राष्ट्रं हि नाम महत् कुटुम्बमेव, नान्यत्। यथा कुटुम्बे प्रधानपुरुषस्य कुटुम्बवर्तिनां सर्वेषां अन्नवस्त्रसम्पादनं आरोग्यादिप्रत्यवेक्षणं च धर्मः तथा प्रजानां प्रथमापेक्षितैतत्सौकर्यसम्पादनं राज्ञो धर्मः। अपरं वस्त्रयुगलं पश्चात् प्रेषयतु भवान्। सद्यो वस्त्रापेक्षिणे अस्मै अद्य एकं युगलं ददतं मां तन्मा प्रतिरुणद्धु।

शास्त्री— एकं वासः प्रतिग्रहीष्यामीति अहमवोचम्। एकमेव वस्त्रं अद्य मे अपेक्षितम्। महाराजो निर्णयतु तत् किं महाराजस्य प्रसादो भवतु अथवा अनेन सत्पुरुषेण दीयतामिति।

रामः— एते विप्राः दारिद्र्येण धन्यमानिनः। युक्तमिव तत्। अथ महावैश्य, किं भवान् ब्रवीति ?

भास्कर— महाराजं प्रार्थये मदीयवस्त्रप्रेषणं दययाऽनुमन्तव्यमिति। अनुपदं अहं गृहं गत्वा प्रेषयिष्यामि (ब्राह्मणं प्रति) स्वामिन्, कुत्र भवतो गृहमस्ति ?

शास्त्री— न, महावैश्य। वैश्यवीथ्यां भवदीयं गृहं अहं जानामि। अहमेवाद्य सायं तत्र आगत्य वसनं ग्रहीष्यामि। प्रेषणपरिश्रमो भवतो मा भूत्।

भास्कर— तदा मम गृहे प्रतीक्षमाणोऽहं वर्तिष्ये।

रामः— रमणीयावसानं इदं प्रेक्षणकम्। महावैश्य, भवदीयं रजतभाजनं आदाय भवान् गन्तुमर्हति।

[भास्करगुप्तः ब्राह्मणः अन्ये च निष्क्रामन्ति]

सुमन्त्रः— महाराज, देवि राज्ञि, धर्मप्रावण्यं प्रजासु एकैकस्यापि जनस्य हृदयान्तःप्ररूढमित्यत्र किमितोऽपि दृढतरं प्रमाणं किञ्चिद् भवेत्। इदं तद्रामराज्यं यत् राजानुरागिणीभिः प्रजाभिः प्रजानुरागिणा राज्ञा च अहोरात्रं अभ्यर्ह्यते।

(यवनिका निपतति)

# रघुवंशः

## (प्रथमः सर्गः)

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥ ५ ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥ ६ ॥
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥ ७ ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥ ८ ॥
रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्गुणैः कर्णमागत्य चापलाय प्रचोदितः ॥ ९ ॥

सोऽहं रघूणामन्वयं वक्ष्ये, इत्यन्वयः। अल्पवाक्सामर्थ्यः सन्नपि ईश्वरप्रसादेन पूर्वाचार्याणामनुग्रहेण च जातधैर्यः अहं रघुतत्पुत्रतत्पुत्रादि-रूपाणां राज्ञां अन्वयं अस्य पुत्रः अयं, तस्य पुत्रः अयमिति उत्तरोत्तर-सन्ततिं वक्ष्ये वदिष्यामि। रघुवंशाभिधं काव्यं करिष्यामीति भावः। पूर्वं सूर्यवंशविषयं काव्यमिति सामान्येनोक्तम्। इदानीं रघोः प्राक्तना राजानो न विषयीभवन्ति। अपि तु रघुप्रभृतय एवेति विशेषं व्यञ्जयन् अत एव सूर्यवंश इति न काव्यस्य नाम, अपि तु रघुवंश इत्येवेति ज्ञापयति।

ननु रघोरन्वयं वक्ष्य इति वाच्यम्। न तु रघूणामन्वयमिति। पुत्रतत्पुत्रतत्पुत्रादिपरम्परैव हि वंशो नाम। यदि बहुवचनेन पुत्र-तत्पुत्रादयः सर्वे गृह्यन्ते तर्हि तेभ्यो व्यतिरिक्तो वंशो नाम कः? उच्यते। अजः, दशरथः, रामः, कुशः इत्येतदादयः रघवः तेषां अन्वयं वंशं

रघोः पुत्रः अजः, तस्य पुत्रो दशरथः इत्येवं मिथः सम्बन्धं वक्ष्य इति विवक्षितत्वात् नास्त्यनुपपत्तिरिति । अथ किमनेन क्लिष्टाभिधानेन । रघोरन्वयं वक्ष्य इत्यक्लिष्टाभिधानं हि वरमिति चेत् सत्यम् । परन्तु तथा सति आजन्मशुद्धत्वादिगुणगणवत्त्वं रघोरेकस्यैव वक्तव्यं स्यात् । इतरेषामनुक्तं स्यात् । तेन काव्यनायकभावोचितं महापुरुषत्वं तेषां अप्रतीतं स्यात् । बहुनायकं हीदं काव्यं कवेश्चिकीर्षितम् । रघुवंश इति नामकरणात् । तेन तेषामपि लोकोत्तरगुणोत्तरत्वप्रतीतये आजन्मशुद्धत्वादिकं वाच्यम् । अतो रघूणामित्याह कविः, न रघोरिति ।

रामायणोपक्रमे 'गुणवान् कश्च वीर्यवान्' इत्युपक्रम्य षोडश गुणाः कीर्त्यन्ते । तदनुकारेण कविरिह षोडश गुणान् कीर्तयति ।

जन्मनि विशेषं प्रथममाह । मरणे विशेषं अन्ते । एतेन कृत्स्नमायुष्कालमेते उत्तमपुरुषभावोचितेन वृत्तेन निन्युरिति व्यञ्जयति ।

आजन्मशुद्धिरियमिति पश्चाद्विवरिष्यते । येषां जन्मप्रभृति शुद्धिरस्ति ते कर्तव्येषु कर्मसु उत्साहिनः श्रद्धालवः धृतिमन्तश्च स्युः । तथा रघवो बभूवुरित्याह— आफलोदयकर्मणामिति । स्ववर्णाश्रमोचितानि कर्माणि अस्खलितं चक्रुः । एतेन उत्साहश्रद्धे व्यज्येते । तानि च आफलोदयं चक्रुः । एतेन धृतिव्यञ्जनम् ।

अनुष्ठितानां कर्मणां दृष्टमेकं फलमाह— आसमुद्रेति । अखण्डभूमण्डलाधिपतित्वं कृत्स्ने भूलोके अप्रतिहतशासनत्वं फलम् ।

भूलोकमात्रे विश्रान्तस्तेषां महिमेति न मन्तव्यम् । तेषां बलपराक्रमौ तथा महान्तौ यथा असुरैः सह प्रसक्तयुद्धा देवाः एतेषां साहाय्यमपेक्षमाणाः एषां स्वर्गलोकपर्यन्तां रथगतिं निराबाधां चक्रुः । अतो यथेच्छं रथमारुह्य देवलोकमपि गन्तुं शक्ता अभूवन्नित्याह आनाकेति । ५

एवमेकेन श्लोकेन स्वरूपस्वभावावुक्तौ । अथापरेण चतुर्षु पुरुषार्थेषु प्रथमस्य धर्मस्य सम्पत्तिमाह । यथाविधिहुताग्नीनामिति यज्ञरूपस्य धर्मस्य सम्पत्तिरुक्ता । यथाकामार्चितार्थिनामिति दानरूपस्य । देवोद्देशेन क्रियमाणः त्यागः यज्ञः । मनुष्योद्देशेन क्रियमाणः सः दानम् । इमौ यज्ञदानरूपौ धर्मौ वर्णान्तरसाधारणौ । क्षत्रियाणामसाधारणं

यथावद् व्यवहारदर्शनात्मकं धर्ममभिप्रेत्याह— यथापराधेति। यस्यापराधस्य यो यावान् दण्डो विधेयः तस्य तावतः न तु न्यूनस्य अधिकस्य वा, विधाने ते जागरूका अभवन्।

दण्डधराणां शत्रवो नियतं भवन्ति। हन्तुं राष्ट्रक्षोभं जनयितुं वा कालप्रतीक्षा भवन्ति। निपुणचारनियोजनेन सर्वं प्रागेव विदित्वा यथाकालं अनर्थोत्पत्तिवारणं कर्तव्यम्। एवं द्विषतां प्रतिकूलाचरणोद्यमविज्ञानविषये तन्निरोधविषये च ते यथाकालं प्रबुद्धा आसन्निति। ६

अथ द्वितीयपुरुषार्थस्य अर्थस्य सम्पत्तिमाह— त्यागायेति। ते सम्भृतार्था अभवन्, कोशसमृद्धिमन्त आसन्। किं अर्थतृष्णया ते कोशं वर्धयामासुः? न। किन्तु देशे काले पात्रेषु विनियोगाय। न्याय्येन मार्गेण आगतं अर्थं सादरं गृहीत्वा कोशे निधाय सुरक्षितं चक्रुः— योग्येभ्यो देयमिति मत्या, न तृष्णया। निस्सङ्गा हि ते।

अर्थविसर्गे प्रस्तुते वाग्विसर्गं स्मरन्नाह— सत्यायेति। अधिकं वाग्विसर्गं ते न चक्रुः। किमिति। अधिकभाषणे अवशात् किञ्चिदसत्यमापतेत्। तत्र सत्यव्रतभङ्गो भवेत्। सत्ये हि सर्वं प्रतिष्ठितम्। तस्य विप्लवे राष्ट्रे सर्वं विप्लुतं स्यात्। अतः सत्यभाषणव्रतभङ्गो मा भूदिति ते मितं अल्पं अभाषन्त। मितभाषणशीला अभवन्। राज्ञि सत्यपरे प्रजा अपि सत्यपरा भवन्ति। यथा राजा तथा हि प्रजाः।

अर्थत्यागे कृते अनात्मज्ञाः आत्मश्लाघां कुर्वन्ति। अनेन मुखेन भाषणे प्रसक्ते 'सत्याय मितभाषिणाम्' इत्याहेति वा सङ्गतिः। 'त्यागे श्लाघाविपर्ययः' इति हि वक्ष्यति। भूरि दत्वा तत्प्रति न किमप्यभाषन्तेत्येतावन्मात्रं न। अपि तु यत् किमपि विषयान्तरं प्रत्यपि ते न बहु अभाषन्त सत्यपरिपालनश्रद्धातिशयेनेति।

सम्भृतार्थानामित्युक्तम्। कुतोऽर्थसम्भरणम्। केषां सकाशात् ते अर्थं प्राप्नुवन्? के तेभ्यो ददुः? अत्रोत्तरं विवक्षन् आह— यशसे विजिगीषूणामिति। रघवः सार्वभौमाः। ये अन्ये तत्तद्देशभूपालाः ते एभ्यः प्राज्यं वित्तं ददति उपदारूपेण। तत् सर्वं गृहीत्वा एते त्यागाय रक्षन्ति। को हेतुः ते एभ्यो वित्तं ददुः? बलपराक्रमाभ्यां महान्तो हि रघवः।

ते परान् युद्धे जित्वा स्ववशयन्ति। पराजिता अपि पुनः स्वस्वपदे स्थापिताः क्षुद्रनृपाः तेन अनुग्रहेण प्रीताः अनल्पं वित्तं तेभ्य उपहृत्य तान् प्रणमन्ति।

अथ किमर्थं रघवः अन्यैः नृपैः युद्धं कृत्वा तान् पराजयन्ते। यदि वित्तार्थमेव तर्हि वित्तकामास्ते, इति भवति। अत्र उत्तरमाह कविः। न वित्ताय परान् जिगीषन्ति रघवः। अपि तु यशसे। मनुप्रभृतयो हि सूर्यवंश्या राजानः सार्वभौमा आसन्। यद्यन्ये राजानः स्वतन्त्रा भवेयुः तर्हि एषां सार्वभौमत्वं रघूणां हीयेत। तेन कुलक्रमागतं सार्वभौमा इति लोकातिक्रान्तबलपराक्रमा इति च यत् दिगन्तविश्रान्तं यशः, तल्लुप्येत। तन्माभूदिति तस्य यशसो रक्षणाय ते परान् विजिगीषन्ते। जितास्तु परे क्षुद्रनृपाः "रिक्तहस्तेन नोपेयात् राजानं दैवतं गुरुम्" इति शास्त्रानुसारेण उपहारमानीय तत्प्रतिग्रहाय निर्बध्नन्ति। दाक्षिण्याच्च एते गृह्णन्ति। न तु विजयस्य उद्देश्यं वित्तम्।

प्रसिद्धवित्तात्मकोऽर्थः एवमुक्तः। अपरोऽप्यर्थोऽस्ति पुत्ररूपः। तत्सम्पत्तिमाह — प्रजायै गृहमेधिनामिति। सन्तानाय एते गृहस्था बभूवुः, न भोगाय। यद्यपि पुत्रस्य धर्मपुरुषार्थत्वं कविरुत्तरत्र ज्ञापयिष्यति अथाप्यत्र अर्थरूपत्वमपि तस्य अभिप्रैतीति भाति। ७

# ॥ वसुमान्-10 ॥

विवाहानुबन्धी कार्यकलापः प्रायः अवसानमवाप। द्वित्राणि दिनानि विश्रम्य वीतश्रमो वसुमान् पुनः आपणस्य उद्घाटनाय व्यापारकरणाय च मतिं कुर्वन्नास्त। सायम्प्रातः मातुलानीवासस्थानं गत्वा पर्यनुयुज्य अपेक्षितानि वस्तूनि सम्पन्नानि चकार। "विवाहो निर्वृत्तः। किमिति मातुलानी स्वगृहं न गच्छति" इति चिन्तां स नाकरोत्। "यावन्तं कालं तिष्ठासेत् तावन्तं कालं सा कामं तिष्ठतु।" इत्युदारं मेने।

4

कस्मिंश्चिद् दिने प्रातः आगतं तं नलिनी उवाच– "सौम्य, एकान्ते त्वयि वक्तव्यं मे किञ्चिदस्ति । अत एव शोभनकर्मणि समाप्तेऽपि अहमत्र वर्ते । यदा ते कार्यान्तरं किमपि नास्ति तदा आगत्य तद् वक्ष्यामि । ब्रूहि तं समयम् । " इति ।

स प्रत्युवाच— " अम्ब मातुलानि, किं मयि भाषणाय त्वया समयप्रतीक्षया भवितव्यम् । यदा त्वमिच्छसि तदाऽहं श्रोतुं सज्जः । अद्यैव तावद् वक्तु भवती यद्वक्तव्यम् । न मे अधुना अन्यत् किमपि कर्तव्यमस्ति । यद्यपि भवेत् नाहं तत् त्वन्निदेशकरणात् गुरुतरं मन्येय ।"

प्रीतिभक्तिभरितैः एतैः वसुमतो वचोभिः आह्लादिता नलिनी, "सौम्य, उदात्तप्रकृतिस्त्वं तदनुरूपं अतिमनोहरं भाषसे । शतायुः भूयाः । अषडक्षीणं तद् वक्तुमिच्छामि । अत्र अन्ये आगच्छेयुः, शृणुयुः । तन्मे न रोचते । निशि भोजनानन्तरं अष्टसु नवसु वा घण्टासु मन्ये त्वं सौधोपरि गृहे एकाकी वर्तिष्यसे । तदा तत्र आगत्य भाषिष्ये यदि त्वं युक्तं मन्यसे, अनुमन्यसे च ।" इति सानुनयं सोपचारमब्रवीत् । " आः, तथैव भवतु । कः प्रतिघातः ।" इत्युदीर्य वसुमान् गृहानगच्छत् ।

पुत्रं शङ्खधरं प्रेष्य तं तदा तत्र स्थितं ज्ञातवती स्वागमनं ज्ञापितवती च नलिनी गृहकृत्यावसाने तमभ्यगच्छत् । सोपानेषु पदविन्यासशब्दे श्रुते सः आसनं विहाय प्रत्युद्गम्य "एहि, मामि" इति तां प्रतिगृह्य आनीय चतुष्पदीं निर्दिश्य " अत्र उपविश, मामि " इति पुनः पुनर्वदन् तां तत्रोपवेशाय निर्बबन्ध । सा तु " न न । नाहं तत्रोपवेक्ष्यामि । पुंसामुचितं तद् आसनं, न तु स्त्रीणाम् । अहमत्रोपविशामि । त्वमासने । उपविश"

इत्यूर्जितं वदन्ती स्वयं भूमावुपविश्य तमासने उपवेष्टुमादिदेश। "तर्हि अहमप्यत्रैव उपविशामि" इत्यभिदधानः सः चतुष्पदीमाकृष्य दूरे विमुच्य स्वयमपि भूमावेव उपविष्टोऽभवत्।

अथ तस्मिन् स्वपुत्रवृत्तान्तं सविस्तरं निवेदयितुकामा नलिनी तत्स्मरणमात्रेण तप्तचित्ता उद्गताश्रुश्च भूत्वा प्रत्यग्रकल्याणे तस्मिन् गृहे अश्रुपातनस्य अनौचित्यमालोच्य कथञ्चित् आत्मानं पर्यवस्थापितवती तमुवाच— "तात वसुमन्, भाग्यलभ्यैः भवादृशैः पुत्रैः पितरौ सुखिनौ कृतार्थौ च भवतः। तव मातापितरौ अद्य अजीविष्यतां चेत् मनुष्यलोके सुलभं उत्तममानन्दं अनुभवन्तौ अभविष्यताम्। गुणवन्तं पुत्रं प्रसूयापि तयोः बत तन्मूलं सुखमनुभवितुं भाग्यं नासीत्। घोरबहुपापसञ्चयाऽप्यहं नूनं तादृशं किञ्चित् पुण्यं कृतवती येन मदुदरे अजातोऽपि ननान्दृगर्भसम्भूतोऽपि त्वं पुत्रस्थाने स्थित्वा अस्मद्वने प्रावण्यं वहसि।"

"मम पुत्रः शङ्खधरः पुत्री कमलालया च न कुलोचिते वृत्ते वर्तेते। तद्गता चिन्ता मां अहोरात्रं बाधते। त्वन्मातुलः प्रकृत्या कोपनः परुषभाषी च सर्वद्वेष्यो जीवति स्म। अद्य रोगार्तः किमपि कर्तुमशक्तः शय्याशरणोऽभूत्। कमलालया कस्मैचिद् देया। शङ्खधरः यथा वृत्तिं काञ्चन लभेत तथा संविधेयम्। स्थितं वित्तं प्रायः सर्वं व्ययितम्। इमां दशां प्राप्य इतिकर्तव्यतामूढा अहं परितप्ये। अगत्या त्वयि इदं निवेद्य तव क्लेशमुत्पादयामि। अनन्यशरणा स्त्री खल्वहम्।"

प्रागेव सुज्ञाततत्कुटुम्बस्थितिः वसुमान्। इदमेव मातुलानी वक्ष्यतीति सः पूर्वमेव अतर्कयत्। कृताध्यवसायश्च तत्कुटुम्बा-

भ्युदयोचितं स्वशक्यं सर्वं कर्तुम् । अतः झटिति उत्तरं ददौ— "मामि, त्वं निश्चिन्ता भव । भगवदनुग्रहेण सर्वं साधु सम्पत्स्यते । अत्र मत्समीप एव त्वं इतः परं वस । पूर्वनिवासं मा स्म गच्छः । श्व एव मम श्वशुरस्य आपणे मत्साह्याय शङ्खधरं नियोक्ष्ये । स मन्ये अनलसः श्रद्धया कर्म कुर्वन् युष्माकं लोकयात्राहेतोः अपेक्षितं धनं समग्रं लप्स्यते । कमलालयाया अपि उचितं वरमन्वेषयामि ।" इति ।

इदमाकर्ण्य प्रहृष्टा नलिनी तं बहुधा प्रशस्य गृहं ययौ । तत्र पुत्रस्य वृत्तिलाभं प्रति पुत्र्याः परिणयं प्रति च वसुमता यदुक्तं तत् सर्वं भर्त्रे निवेद्य शय्यामभजत, सुखं च सुष्वाप । स्वगृहं प्रति निवर्तनं इतः परं नास्ति । सर्वथा तत्प्रतिरुद्धमिति मणिबाहुः भार्याया वचांसि श्रुत्वा प्रतिपेदे । किं नाम अल्पं वटुं वसुमन्तमाश्रित्य अस्माभिर्जीवितव्यमिति महतीं मनोव्यथां प्राप । गत्यन्तरशून्यां आत्मनो दशां विचिन्त्य प्रम्लानमना बभूव ।

परेद्युः प्रातः वसुमता सह आपणं गतः शङ्खधरः तेन निर्दिष्टं तत्तत् कर्म शीघ्रं च सम्यक् च निर्वर्तयामास । एवं दिने दिने कुर्वन् अचिरेण कालेन यथा वसुमान् तथा वाणिज्ये निपुणो बभूव । वसुमत आचरणैः उपदेशैश्च गुणपौष्कल्यं प्राप्य महापुरुषतया परिणामं च भेजे ।

वसुमतः परमसुहृत् युवा कश्चित् सुदर्शनो नाम । तस्य अचिरोढा पत्नी केनचित् कारणेन अतर्कितं ममार । स पुनर्विवाहाय कन्यामन्विष्यन्नासीत् । स कस्मिंश्चिद् दिने वसुमतो गृहमागत्य तेन सह सम्भाषमाणः अन्तः स्थिताया ललितायाः सविधं गच्छन्तीं स्वदृष्टौ पतितां कमलालयां सावधानं ददर्श । तत

சரீரத்தின் ஸ்வரூபமும், ஆத்மஜ்ஞானத்திற்கு வேண்டிய ஸாதநமும், ஆத்மஸ்வரூபமுமாகிய மூன்றையும் இவ்வாறு சுருங்கச் சொன்னேன். இவற்றை என் பக்கல் பக்தியுடன் தெளிந்து மோக்ஷம் பெற யோக்யதையுடையவனாகிறான்.

५०७ प्रकृतिं पुरुषं चैव विद्ध्यनादी उभावपि ।
विकारांश्च गुणांश्चैव विद्धि प्रकृतिसम्भवान् ॥ १७ ॥

अथात्यन्तविविक्तस्वभावयोः प्रकृत्यात्मनोस्संसर्गस्यानादित्वं, संसृष्टयोर्द्वयोः कार्यभेदः, प्रवाहानादेस्संसर्गस्य निमित्तं चोच्यते — प्रकृतिं– प्रधानम्, पुरुषं चैव– जीवात्मानं च, उभावपि– अन्योन्यसंसृष्टौ द्वावपि, अनादी– न विद्यते आदिः ययोस्तौ, विद्धि- जानीहि, विकारांश्च- 'इच्छाद्वेषस्सुखं दुःखम्' इति प्रस्तुतान् आत्मनः शरीरसम्बन्धप्रयुक्ततया क्षेत्रकार्यत्वाभिमतान् इच्छाद्वेषादीन् बन्धहेतुभूतान् कार्यवर्गान् गुणांश्चैव — अमानित्वादीन् प्रस्तुतान् मोक्षहेतुभूतांश्च, प्रकृतिसम्भवान्– प्रकृतिः– त्रिगुणात्मिका, सा सम्भवः येषां तान् , विद्धि– जानीहि, प्रकृतेरेवाकारभेदेन हेयत्वोपादेयत्वज्ञापनार्थस्तत्सम्भवत्वोपदेशः ।

மூலப்ரக்ருதிக்கும் ஜீவனுக்கும் ஸம்பந்தமானது அநாதி காலமாயுள்ளது. ஸம்ஸாரபந்தத்திற்குக் காரணங்களாயுள்ள இச்சை, த்வேஷம், முதலிய விகாரங்களும், மோக்ஷஹேதுக்களான குணங்களும் ப்ரக்ருதிஸம்பந்தத்தாலேற்பட்டவை. ஆகவே ப்ரக்ருதியானது பந்தத்திற்கும், மோக்ஷத்திற்கும் காரணமாகின்றபடியைத் தெளிந்து மோக்ஷஹேதுவான வழியில் அதை அமைத்துக்கொள்ளவேண்டும்.

५०८ कार्यकारणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषस्सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥ १८ ॥

अथान्योन्यसंसृष्टयोः प्रकृतिपुरुषयोस्संसर्गविशेषनिबन्धनो व्यापारभेद उच्यते–'कार्य'शब्दोऽत्र भोगायतनाख्यकार्यपरः, प्रकरणात् 'कारण' शब्दसमभिव्याहाराच्च । तथा कारणशब्दोऽपि 'इन्द्रियाणि दशैकञ्च' इति

प्रकृतेन्द्रियविषयः, कर्तृशब्दोऽत्र व्यापाराश्रयपरः, प्रयत्नाश्रयत्वरूपकर्तृत्वस्याचेतने प्रकृतावसम्भवात् । कार्यकारणानाम्– शरीरेन्द्रियाणाम्, कर्तृत्वे स्वस्वव्यापाराश्रयत्वे, प्रकृतिः– पुरुषाधिष्ठिता प्रकृतिरेव, हेतुः– कारणम् , उच्यते, पुरुषाधिष्ठितक्षेत्राकारपरिणतप्रकृत्याश्रया भोगसाधनभूताः क्रियाः इत्यर्थः । पुरुषः– प्रकृतिसंसृष्टश्चेतनः, सुखदुःखानाम्– सांसारिकाणां एतेषाम्, भोक्तृत्वे– अनुभवितृत्वे, हेतुः कारणम्, उच्यते, प्रकृतिसंसृष्टश्चेतनः सुखदुःखानुभवाश्रयः इति यावत् । 'तत्कालस्वसमवेतसुखदुःखसाक्षात्कारो भोगः' इति भोगलक्षणमप्यनेन सूचितम् ।

சரீரமும், இந்த்ரியங்களும் தம் தம் கார்யங்களைச் செய்வதற்குக் காரணம்- ஜீவாதிஷ்டானம் பெற்ற ப்ரக்ருதியே. ப்ரக்ருதி ஸம்பந்தம் பெற்ற ஜீவன், ஸுகதுக்கங்களை அநுபவிக்கிறான். பரஸ்பரம் சேர்ந்துள்ள ப்ரக்ருதிக்கும், ஜீவனுக்கும் தனித்தனியேயுள்ள வ்யாபாரங்களிவை.

५०९ पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥ १९ ॥

एवमन्योन्यसंसृष्टयोः प्रकृतिपुरुषयोः कार्यभेद उक्तः; पुरुषस्य स्वतस्स्वानुभवैकसुखस्यापि वैषयिकसुखदुःखोपभोगहेतुमाह 'पुरुषः' इत्यर्धेन। पुरुषः– स्वतस्स्वानुभवैकसुखश्चेतनः, प्रकृतिस्थः– प्रकृतिसंसृष्टः, प्रकृतिजान्– प्रकृतिसंसर्गोपाधिकान्, गुणान्– सत्त्वादिगुणकार्यभूतान् सुखदुःखेच्छादीन् भुङ्क्ते हि– अनुभवति किल, गुणशब्दः सत्त्वादिगुणकार्येष्वौपचारिकः । स्वानुभवैकतानस्य वैषयिकसुखदुःखोपभोगे हेतुः प्रकृतिसंसर्गः इत्युक्तं भवति । परिशुद्धस्यात्मनः प्रकृतिसंसर्गहेतुमाहोत्तरार्धेन । अस्य– पुरुषस्य, सदसद्योनिजन्मसु साध्वसाधुभूतदेवादियोनिप्रादुर्भावेषु, कारणम्, गुणसङ्गः– सत्त्वादिगुणकार्यसुखदुःखादिषु रागः, दुःखसङ्गो नाम दुःखे सुखभ्रान्त्या सङ्गः । सुखादिषु सक्तः तत्साधनेषु पुण्यपापकर्मसु प्रवर्तते; ततस्तत्फलानुभवाय साध्वसाधुषु योनिषु जायते, ततश्च कर्मारभते; ततश्च जायते । अमानित्वादिगुणसेवनेन गुणसङ्गो निवर्तते, ततश्च कारणाभावात् कार्याभाव इति न्यायात् सदसद्योनिजन्मप्रवाहोऽप्युच्छिद्यते ।

ஜீவாத்மா இயற்கையில் ஜ்ஞாநாநந்தஸ்வரூபன். இவனுக்கு ப்ராக்ருதிஸம்பந்தத்தினால் ஸுகதுக்காதிகளின் அநுபவம் ஏற்படுகின்றது. தேவன் மநுஷ்யன் என்றாற்போல் ப்ராக்ருதி ஸம்பந்தமிவனுக்கு ஏற்படுவதற்குக் காரணம் அதற்கு முன் ஸுகதுக்காதிகளில் அவன் வைத்த ராகமே. அதற்காகப் புண்யபாபகர்மாக்களை அவன் செய்ய அவற்றால் தேவன் மநுஷ்யன் என்றாற்போல் சரீரத்துடன் ஸம்பந்தம் பெறுகிறான். இப்படி விதையும் முளையும் போல் ஒன்றுக்கொன்று காரணகார்யமாய் இவை இவ்வாத்மாவிற்குத் தொடர்ந்து வருகின்றன.

५१० उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः ॥ २० ॥

सदसद्योनिजन्मसमनन्तरभाविनः पुरुषस्वभावानाह— अस्मिन्, देहे, (अवस्थितः) परः— अपरिच्छिन्नज्ञानशक्तिः, पुरुषः, उपद्रष्टा— यथावत्स्वयमप्रवृत्तः प्रवर्तमानस्य देहस्यानुसन्धाता, अनुमन्ता च— प्रवृत्तस्य देहस्य प्रवर्तकश्च, भर्ता— देहस्य धारकः, भोक्ता— देहप्रवृत्तिजनितसुखदुःखयोर्भोक्ता, नियन्तृत्वधारकत्वशेषित्वानि शरीरिलक्षणानि क्रमेणेह सङ्गृहीतानि । (अतः) महेश्वरः— देहादिकं प्रति महेश्वरः, "शरीरं यदवाप्नोति यच्चाप्युत्क्रामतीश्वरः" इति जीवस्य स्वशरीराद्यपेक्षयेश्वरत्वं वक्ष्यमाणमिहानुसन्धेयम् । परमात्मेति चापि देहेन्द्रियमनांसि प्रति ज्ञानतो व्याप्त्या परमात्मेति च, उक्तः—शास्त्रेष्वभिहितः । देहे मनसि चात्मशब्दः 'ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना' इति अनन्तरमेव प्रयुज्यते, अतस्तदपेक्षया परमात्मत्वं जीवस्य युक्तम् ।

தேஹஸம்பந்தம் பெற்ற ஜீவன், தேஹம் முதலியன தம் தம் கார்யங்களில் ப்ரவர்த்திக்கும்போது அவற்றை அறிந்தும், மேன்மேல் ப்ரவர்த்திக்கச்செய்தும், அவற்றை தரித்தும், அவற்றால் வரும் ஸுகதுக்கங்களை அநுபவித்தும் வருகிறான். ஆகவே தேஹம் முதலியவற்றிற்கு மஹேச்வரன் என்றும், பரமாத்மாவென்றும் சொல்லப்படுகிறான்.

५११ य एवं वेत्ति पुरुषं प्रकृतिं च गुणैस्सह ।
सर्वथा वर्तमानोऽपि न स भूयोऽभिजायते ॥ २१ ॥

अथ विवेकानुसन्धानप्रकारं वक्तुं तत्रात्यादराय तत्फलं प्रदर्श्यते- एवम्- उक्तस्वभावं पुरुषम्, एवां- प्रकृतिं च- उक्तस्वभावां प्रकृतिं च, गुणैस्सह- चतुर्दशे प्रपञ्चयिष्यमाणैस्सत्त्वादिगुणैस्साकं, यः- पुरुषः, वेत्ति- यथावज्जानाति, सः, सर्वथा योगविरोधिविचित्रक्लेशान्वयिदेहसम्बन्धवत्तया, वर्तमानोऽपि- सन्नपि, अपिशब्दात् अक्लिष्टवृत्तिषु कैमुत्यं सूचितम् । न- भूयः अभिजायते- पुनः प्रकृतिसंसर्गं नार्हति- प्रलयाद्यवस्थासु जन्माभावेऽपि पुनर्देहसम्बन्धयोग्यताऽस्ति अस्य तु ज्ञानाग्निदग्धकर्मत्वात् सा योग्यतापि नास्ति । अपहतपाप्मानमात्मानं तद्देहावसानसमये प्राप्नोति ।

*முன் கூறிய ஸ்வபாவத்துடன் புருஷனையும் ப்ரக்ருதியையும் மேல் சொல்லப்படும் ஸத்த்வம் முதலிய குணங்களுடன் யாவனொருவன் நன்கறிகின்றான் அவன் இஜ்ஜந்மத்தில் யோக விரோதியான பற்பல கஷ்டங்களுடனிருந்தபோதிலும் மறு பிறவியிராமல் ஆத்மலாபம் பெறுகிறான்.*

५१२ ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे ॥ २२ ॥

उक्तमेवार्थं श्लोकद्वयेन विवृण्वन्नात्मज्ञानस्य पर्वभेदानाह- आत्मपदत्रयमिह क्रमेण शरीरजीवात्ममनःपरं; अधिकरणतया कर्मतया करणतया च निर्देशात् । उत्तरोत्तरापकृष्टपर्वनिर्देशक्रमश्चेह भाव्यः । केचित्- निष्पन्नयोगाः, आत्मनि- शरीरे (वर्तमानं) आत्मानं- जीवात्मानं, आत्मना-मनसा, ध्यानेन-योगेन, पश्यन्ति-साक्षात्कुर्वन्ति, "योगो नाम- ज्ञानयोगसाध्यः आसनादिपरिकरवान् साक्षात्कारार्थं चित्तसमाधानविशेषरूपो व्यापारः" 'ज्ञानकर्मात्मिके निष्ठे योगलक्ष्ये सुसंस्कृते' इति सङ्ग्रहोक्तः । अन्ये अनिष्पन्नयोगाः, साङ्ख्येन- योगेन, ज्ञानयोगेन, योगयोग्यं मनः कृत्वा आत्मानं पश्यन्ति । अपरे च ज्ञानयोगानधिकारिणः, तदधिकारिणश्च सुकरोपायसक्ताः, व्यपदेश्याश्च कर्मयोगेन- योगयोग्यतामापाद्यात्मानं पश्यन्ति ।

(*d*) " It is not given to many to make this surrender to Me " adds Krishna " because of the sins committed in their previous births. It will be available only for men of good deeds and these men of good deeds are of four kinds, in accordance with the different purposes, for the attainment of which they worship Me : 1. those who having lost their wealth want to regain it, *arta* ; 2. those who seek wealth : *artharthin* ; 3. those who want to enjoy their own pure soul, *i.e.*, their own soul freed from bondage ; *jignasu*, and 4. those who want to attain Me, *jnanin*."

(*e*) Of these four kinds of devotees of Bhagavan the last mentioned one is the best. Krishna tells Arjuna so. He is His own Self. The reason He gives is that the devotion to Him of the first mentioned three is conditioned by their desire to realise their respective objects. These are interested in Him not for His sake but as the means of fulfilling their desires. But not so the last mentioned one ; Krishna is all for him ; He is the end to be achieved ; He is the means ; He is all other desires of his ; he is interested in nothing but *Bhagavan*. " He loves Me immensely " says Krishna, " and I love him equally immensely ". This one with one-pointed devotion towards Me excels others. Such a devotee is very rare. To be such is the result of very many virtuous births in the past".

Thus Bhagavan's nature, its obscuration by matter, the means of removing it *prapatti*, sorts of devotees* and the excellence among them of *jnanin*, are the five main points dealt with in this chapter, according to the *sangraha sloka*.

* भेक्तभेद:—भक्तिभेद: is the reading given in the text published with translation in this Journal Vol. XII No. 1. According to the commentaries however it should be भक्तभेद: and this appears to be most appropriate.

8. The first two of the four kinds of devotees may, for the sake of convenience, be put together as wealth-seekers. These wealth-seekers and the two other sorts of devotees, soul-seekers and God-seekers, have to know or practise certain things. To teach these is the purpose of the eighth chapter. This is said in the concerned *Sangraha Sloka.*

The soul-seekers have to know:

1. The pure soul as distinct from matter (*prakriti*), (*Brahma*).
2. Matter (*prakriti*); (*adhyatma*) and
3. Procreation or seeding (*karma*).

The first of these has to be known since it is the goal the seeker wants to reach. The last two are to be known because a soul-seeker has to avoid them.

The wealth-seeker should contemplate:

1. such rare and pleasant objects of enjoyment as are superior even to those enjoyed by Indra and the four-faced Brahma (*Adhibhuta*); and
2. a situation in which he himself enjoys those pleasant things (*adhidaiva*).

The God-seeker as well as the above mentioned two, all of these, should always be aware that it is the Supreme Lord, Sri Krishna, who is worshipped by the *Mahayajnas* and other actions which they are performing as their daily routine though they are actually referring to Indra and other similar gods, all of whom are but His forms.

Another fact which all these devotees should know is that a remembrance of the Lord in the last moment of their life, *i.e.*, at the time of their last breathing is an important factor for the realisation of their cherished goal.

The remembrance that happens in the last moment of one's life is called *antima smriti*. This is said to determine one's future birth. It is said in Jada Bharata's story that he died remembering the deer which he was very fond of and consequently he was born a deer. The *antima smriti* of the wealth-seeker, therefore, ought to be such as grasps the Lord as the most shining one and the Over-lord of the universe; that of the soul-seeker as the *Akshara* taught in the Upanishad (Br. 5. 8. 7.) and that of the God-seeker as one possessing that particular set of qualities which is enjoined in the Upanishads in respect of the particular *Vidya* or *Upasana* which the seeker takes up for practising.

As the *antima smriti* is the result of constant thought and meditation done throughout one's life, it is implied here that these seekers should practice the *Upasana* or meditation on the Lord throughout their life on the method laid down in the sastras, taking Him in the same aspect as was described in connection with their respective *Antima smriti*.

In other words these *bhaktas* should practise the *bhajana* or *upasana* of the Lord daily at the time allotted for it, up to the very end of their life when, as the result of the long continued practice they will get their respective *antima smriti* and subsequently realise and enjoy the desired objects.

There is something to be noted in respect of the results to be achieved by these yogins, these *bhaktas* of the Lord. The wealth or power obtained by the wealth-seeking *bhakta* will be only a temporary one. It will not last for ever. He may enjoy it for a long time. However long the time may be, it will come to an end and the enjoyer will return to this *samsara*. But this is not the case with the other two devotees. They will never

RASHTRIYA SANSKRIT VIDYAPEETHA TIRUPATI



return to *samsara*. The soul-seeker will first enjoy his own soul in its absolute purity and then attain *moksha* in its ultimate sense, *i.e.*, The Supreme *Brahman*, which the God-seeker attains directly, soon after he departs from his mortal body after *antima smriti*. After the attainment of this sort of *moksha* there is no possibility of any one returning to *samsara*.

It is said in the Vedas that there are two different paths which lead virtuous souls to their repective destinies. One is called *archiradi*, the one where Light and others serve as guides and the other, *dhumadi*, the one where Smoke and others serve so. Those that practise *upasana* for the attainment of *moksha* will take up the *archiradi* path and go to that world. All others, *i.e.* all those that have done mere good actions will take up the *dhumadi* path and go to *svarga* or some other world other than and inferior to the world of *moksha*. It is said at the end of this adhyaya that the soul-seekers and the God-seekers should always keep in their minds, the *archiradi* path.

9. (*a*) When at the end of the sixth chapter Krishna curtly introduced His own *yoga*, namely the *bhaktiyoga*, *bhajate yo mam*, Arjuna seemed to have evinced much interest in it and much enthusiasm to learn it. Krishna therefore, with a view to teach him the *yoga*, began with a description of His own nature which subsequently led Him to deal with several other topics.

It is generally seen that persons listening to some body speaking very high of himself look at him with disapprobation and do not believe in all that he says. Such was not the case with Arjuna now. He quite believed in all that Krishna said to Him so far about Himself, about His greatness. This pleased Krishna very much. So he

Registered No M 2300.

Book XXXIV ॥ श्रीः ॥ Nos. 9-10

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३४] कलि ५०६४ – शुभकृत् ऋषभ-मिथुने [सं ९-१०

# THE UDYANA PATRIKA

A
SANSKRIT MONTHLY

May & June 1962.

In case you have not received the previous number please inform the Editor or Publisher immediately.

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।
२ ग्राहकीबुभूषद्भिर्दययया प्रथममेव मूल्यं प्रेषणीयम् ।
३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।
४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण ।)
७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor,* The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 मीनाक्षीशतकम् ।
2 विनयाधानम् ।
3 रामराज्यम् ।
4 वसुमान्-11
5 रघुवंशः ।
6 प्रकृतिभेदः ।
7 पुस्तकपरामर्शः ।
8 श्री लक्ष्मीपञ्चाशत् ।

The Githartha Sangraha—41-44.

KENDRIYA SANSKRIT VIDYA PEETHA TIRUPATI. LIBRARY.

कृतिमारचयति तस्मिन् वीटीदानान्तरप्रसुप्तायाः ।
पत्नया नियोगमारादशून्यमतनिष्ठ किल भवती ॥ १० ॥

अस्मत्कुले स्वतां ते वृद्धैर्बहुशो निरूपितां बुद्ध्वा ।
दोषाविलोऽप्यनर्होऽप्यस्मि समुत्पन्नहेवाकः ॥ ११ ॥

त्वन्निलयपरिष्करणैस्त्वदुत्सवारम्भणव्यवस्थाभिः ।
यदुपासितासि पूर्वैस्तदर्थमेवास्म्यनुग्राह्यः ॥ १२ ॥

मय्यवगुणसङ्घातस्तव मन्ये भूरिभाग्ययोगोऽयम् ।
मदवनमात्रात् सद्यः फलति यशस्ते निरुपमानम् ॥ १३ ॥

खर्वं प्रांशूकर्तुं मूर्खं विद्याविशालमाधातुम् ।
अभ्यर्थ्यसेऽत्र मातर्दातुः सदृशं किलैष्टव्यम् ॥ १४ ॥

फलमभिलषितुं जाने न्यासमिवाहर्तुमेतदन्यदिति ।
दातारं प्रवणयितुं वाचामपि कौशलं नास्ति ॥ १५ ॥

केन गुणेनाम्ब त्वां काभिः स्तुतिभिर्विनोदिनीभिरुत ।
सम्प्रीणयामि सेवां कामलसो वा विधास्यामि ॥ १६ ॥

क्षणमपि मातर्ध्यातुं त्वन्मङ्गलविग्रहं ददाति मनः ।
चपलमिदं नावसरं स्थूणवदग्रे स्थितेऽपि मयि ॥ १७ ॥

दूये दुःखभरेण त्वामाश्रितपालनीं च जानामि ।
सेवितुमेवाशक्तं चेतो हा धिक् परिभ्रष्टम् ॥ १८ ॥

परिधावति हन्तैतत् सहसा विषयान्तराणि मलिनानि ।
दुर्वासनानिरङ्कुशममुमुपरोद्धुं न शक्नोमि ॥ १९ ॥

सम्पश्यतोऽक्षिणी मे श्रवसोः पदमेति ते महिमा ।
त्वामपि गृणाति रसना चित्तायत्तं हि सन्तरणम् ॥ २० ॥

निष्पीडय विद्रावय विध्वंसय वा विपत्स्वदः क्षिप्त्वा ।
यावन्निष्ट्यूतमलं चेतस्त्वामम्ब शरणयति ॥ २१ ॥

अथवा मय्यपि दुःखैर्निष्टप्ते हन्त बाष्पमुत्सृजति ।
न द्रवति चित्तमेतन्न प्रावण्यं च वा धत्ते ॥ २२ ॥

आपत्सु कोमलत्वं चेतो व्रजतीति सत्सु सङ्कटते ।
तास्वपि न स्तब्धत्वं मुञ्चति मातर्मनो मत्कम् ॥ २३ ॥

परिचलतः किल जगतः त्वमात्मभूता कला काऽपि ।
किञ्चिदिदं मच्चेतः त्वामपि दर्पान्न भावयति ॥ २४ ॥

निःशरणमापदाहतमपि परिभूतं सदा परैर्मृदितम् ।
सर्वत्र दीनमेतच्चेतस्त्वय्यम्ब दुर्दान्तम् ॥ २५ ॥

यद्यणुमात्रां सिद्धिं सम्भावनयैव पश्यति प्राप्याम् ।
तेनैव दृप्तमेतत् त्वामपि तुच्छीकरोति मनः ॥ २६ ॥

दुःस्वातन्त्र्यविलोलं शरणयति त्वां मनो न मे भक्त्या ।
आशाभङ्गक्रुद्धं किं तु त्वामेव परिवदति ॥ २७ ॥

क इव विनेष्यत्येतत् कोन्वनुरुध्येत शोधयेत् को वा ।
दत्तोऽञ्जलिरस्य कृते त्वमीषदनुकम्पसे नो चेत् ॥ २८ ॥

त्वय्यर्पयामि न मनस्तथापि नार्हस्युपेक्षितुं मातः ।
दुष्पुत्रमपि च जननी द्वेष्टि न विदितापराधशतम् ॥ २९ ॥

चेतस्त्वत्पदनलिने निश्चलमाधातुमेष न समर्थः ।
कथमपि करुणार्थी ते दैन्यं मम विस्तराद्वच्मि ॥ ३० ॥

अम्ब मम दुःखजालं कस्य पुरस्तान्निवेद्य नीरुक् स्याम् ।
त्वमपि यदि दीनवागिति जन इव कुत्सां बिभर्षि मयि ॥ ३१ ॥

कर्णान्तचपल एष प्रार्थयते त्वां कृपाकुलोऽपाङ्गः ।
श्रोतुं मत्परिदेवनमभ्याशे कृतगतागतिकः ॥ ३२ ॥

प्रभवद्भिरवज्ञातोऽप्यवमानाब्धौ निमज्जितोऽप्यनिशम् ।
मातः प्राणान् विषहे त्वदपाङ्गाशंसयैवाहम् ॥ ३३ ॥

कति कति सिद्धारम्भा लोके जयिनो भ्रमन्ति संहृष्टाः ।
कुत्र तपस्तैस्तप्तं मातः किं दुष्कृतं च मया ॥ ३४ ॥

विद्यामपि लब्धवतो जयशीलत्वं नितान्तमाशास्यम् ।
दृपदिव कूपे क्षिप्ता तिष्ठत्ययमन्यथा जोषम् ॥ ३५ ॥

जयिनापि लोभनीयं प्रवृत्तिसामान्यसाध्यमिह लोके ।
सर्वफलप्रतिरूपं वित्तं विद्याफलं रुचिरम् ॥ ३६ ॥

सिञ्चन् सिञ्चन् सस्यं कणिशोद्भेदं मनाक् न पश्यामि ।
घर्षं घर्षं चन्दनलवमपि नासादये किमिदम् ॥ ३७ ॥

यत्ने महति कृतेऽपि व्यपोह्यते चेत् फलागमो विधिना ।
तस्मात् परमस्ति किमु व्यथा निदानं प्रयत्नवताम् ॥ ३८ ॥

नाकर्मकृत् प्रजातः कर्म निदानं तथोच्चनीचस्य ।
मानयशोमूल तद्विपद्यते चेद्वरं मृत्युः ॥ ३९ ॥

कृतविकलयत्नमारात् प्रशस्यते कर्म भीरुरलसमतिः ।
नैजक्रियाविनाशं यदेष न प्रेक्षते धन्यः ॥ ४० ॥

जयिनां निसर्गतोयं दास्येऽप्युत्पन्नगौरवो लोकः ।
न तु जानाति पराजितमनुकम्पितुमर्वति हित्वा ॥ ४१ ॥

आशाच्छेदाद्विहितक्रियाविनाशात् जनावमतिदैन्यात् ।
निःश्वसोष्मग्लपितः पुरुषः स्मरति स्वदौर्भाग्यम् ॥ ४२ ॥

षण्ढ इव कामिनीनां मन्मथकेलिं प्रपञ्चयन् पुरतः ।
मोघीकृतसंरम्भः कस्य न हास्यो भवेल्लोके ॥ ४३ ॥

संवर्ध्य विभवसारैरगणितखेदाः सदैव गुरवो माम् ।
परिणतिकाले वन्ध्यं दृष्ट्वा स्थाने हि शोचन्ति ॥ ४४ ॥

मम मातर्हितकामा मा भूवंस्ते मया हताशंसाः ।
तेषामर्थं करुणं प्रणाध्यसे त्वं जगन्नाथे ॥ ४५ ॥

# ॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पणातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३४] कलि ५०६४ शुभकृत्-ऋषभ-मिथुने [सं ९-१०
(1962-May-June)


## विनयाधानम्

प्रबुद्धा विद्यार्थिनः । उत्तमकलाशालासु उत्तमासु कक्ष्यासु अधीयानाः ।

संवत्सरपरीक्षा उपस्थिता । अधिकारिणः परीक्षादिनं निश्चित्य प्रकटयन्ति स्म ।

तद् दिनं विद्यार्थिनो नैच्छन् । अधिकारिणां सविधमेत्य 'न तस्मिन् दिने परीक्षा प्रवर्तनीया । किन्तु कतिपयदिनानन्तरं प्रवर्तनीया' इत्यावेदयन् ।

अधिकारिणः तत् नाङ्गीचक्रुः । स्वाभिप्रायानुरोधे अभिनिवेशवन्तः विद्यार्थिनः कार्यालये समुदिताः अधिकारिणां कार्यालयात् निष्क्रमणं बहिर्गमनं च यथा न शक्यं तथा संरुरुधुः ।

अधिकारिणः पालकानाजुहुवुः । ते आगत्य बाष्पप्रसेकं अन्यच्च कृत्वा विद्यार्थिनोऽपसार्य अधिकारिणो मोचयन्ति स्म ।

अचिरवृत्तमिदम् । विद्यार्थिनां ईदृशा विनयातिक्रमाः तत्र तत्र बहवो वृत्ताः श्रूयन्ते । क्रमेण वर्धन्त इति भाति ।

विद्याया मुख्यलक्ष्यं विद्यार्थिनां विनयाधानम् । विद्याशालासु विद्यां गृह्णतामेव चेत् विनयो न भवति, प्रत्युत अविनयो

वर्धते, किं वक्तव्यमितरान् जनान् प्रति। प्रायः सर्वे एव जनाः सम्प्रति अविनीता दृश्यन्ते।

अत्र मूलकारणं समुचितविद्याप्रचारविरह एव।

विद्या द्विविधा— विनयाधायिनी, व्यवहारौपयिकी चेति। वेदशास्त्रपुराणेतिहासनीतिकथोपन्यासपूर्वकं अनृतवदनपरहिंसापरिवादचौर्याद्यकार्यवैमुख्यापादकतया आत्मगुणवर्धकतया च क्रियमाणोपदेशरूपा प्रथमा विद्या।

भूगोलं, खगोलं, विविधानि शिल्पानि, गणितं, नानाविधाः कलाः, राज्यतन्त्रं, अर्थशास्त्रं इत्यादिषु गाढव्युत्पत्तिसम्पादिका द्वितीया विद्या।

तत्र आद्या विद्या सर्वजनसाधारणी। अस्मिन् लोके जातो मनुष्यः एकैकोऽपि तया सम्पन्नो भवितुमर्हति। अवश्यं एकैकेनापि सा अधिगन्तव्या।

प्रथममध्यमोत्तमभेदेन त्रिषु पर्वसु स्थितासु विद्याशालासु याः प्रथमे पर्वणि स्थिताः तत्र सर्वासु कक्ष्यासु उक्तविद्योपदेशप्रधाना विद्या बालेभ्यः प्रदेया। बाल्ये जातः संस्कारः दृढः सन् यावज्जीवमनुवर्तेत। तेन ते यावज्जीवं योग्या जीवेयुः।

मध्यमोत्तमपर्वविद्याशालास्वपि संस्कारदार्ढ्याय उपदेशरूपा विद्या अंशतोऽनुवर्तनीया। व्यावहारिकी विद्या द्वितीय एव पर्वणि आरम्भणीया। क्रमेण विशेषतः परिचेया।

एवं सति समाप्तविद्याः कलाशालां विहाय लोकयात्रां कर्तुं प्रवर्तमानाः पुरुषाः स्वस्वव्यापारान् धर्माविरोधेन श्रद्धया सर्वलोकहितकामनापूर्वकं च कुर्युः।

देशपरिपालने स्थिताः जननायकाः लोकहितप्रवणाः सज्जनाश्च इदमत्यन्तं अवधातुमर्हन्ति । अद्य विद्यार्थिप्रभृतिषु दृश्यमाना अविनयवृद्धिः यदि उपेक्ष्येत तर्हि आयत्यां देशक्षोभे नाशे च पर्यवस्येत् ।

बह्वचो भेदबुद्धयो जाता इदानीं देशे बहून् अनर्थान् जनयन्ति । तदर्थं भेदनाशे न यतितव्यम् । स्वस्वभाषापक्षपातेन स्वस्वप्रदेशाभिमानेन च जनाः कलहायन्ते । ततः किं भाषाभेदविनाशेन एकभाषामात्रपरिकल्पने, प्रदेशभेदविध्वंसनेन अखण्डैकदेशमात्रावस्थापने च यतनीयम् ? तथा चिरानुवृत्तभेदान्तरलोपनेऽपि दृष्टिर्न कार्या ।

जनानां मनसि समुचितविनयाधानमेकं भूतभविष्यद्वर्तमानसर्वानर्थपरिहारकारणम् । तस्मात् लोकहितप्रवणा महान्तः विनयाधायिन्या विद्यायाः सार्वत्रिकः समुन्मेषो यथा भवेत् तथा सद्यः काञ्चन प्रवृत्तिं कर्तुमर्हन्ति ।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्य उत्तमो राजा)

वि. वि. श्री.

## द्वितीयेऽङ्के चतुर्थं प्रेक्षणकम्

प्रासादे एकान्तगृहम् । प्रदोषानन्तरः कालः ।
(सन्ध्यामुपास्य व्याघ्रचर्मासने उपविष्टो रामः ।
तस्य समीपे तिष्ठति सुमन्त्रः । )

सुमन्त्रः — सन्ति केचन विषयाः, येषु महाराजा अपि सचिवानां अभिप्रायं अनुरक्तानां प्रकृतीनां प्रार्थनां च अनुरोद्धुं अर्हन्ति ।

रामः— सचिवोत्तम, न मे तव कदाचिदपि सन्देह आसीत्। परन्तु प्रकृतो विषयः तादृश इति किं भवान् निरूपयितुं शक्नोति ?

सुमन्त्रः— महाराज, यदि भवान् केवलः कश्चित् पौरमात्रोऽभविष्यत्, तर्हि भवतः स्वरक्षाभरः भवन्मात्रे विश्रान्तोऽभविष्यत्। भूपालस्तु स्वरूपतः शरीरतश्च प्रजानां स्वभूतः। स स्वरक्षायां मनागप्यौदासीन्यं प्रकाशयितुं नार्हति।

रामः— कस्ते तां वार्तां प्रैषयत् ?

सुमन्त्रः— महाराज, साक्षाद् विभीषणः। स लङ्केश्वरः कस्यचित् पुरुषस्य मुखेन मह्यं, मद्द्वारा महाराजाय च इमं सन्देशं प्रेषितवान्—इन्द्रजितः पुत्रः कश्चित् स्वकुलनाशप्रतीकारमुद्दिश्य लङ्कातः अयोध्यां प्रति प्रस्थितः इति।

रामः— तस्य किं नामेत्यवोचः ?

सुमन्त्रः— विश्वजित् इति। युद्धकाले किल स बाल आसीत्।

रामः— प्रत्येति भवान् सः अयोध्यायां वर्तत इति ?

सुमन्त्रः— तथाऽहं अशृणवम्। प्रत्येमि च। नानाकपटरूपधारी सः नगरे सञ्चरन् समयं प्रतीक्षमाणो वर्तत इति भाति।

रामः— मां हन्तुम् ? तथा नु ? तत् किं तथा सुकरं भवान् मन्यते ?

सुमन्त्रः— यदि प्रकटं युद्धं भवेत् तर्हि तव यन्महाराजो वदति तत् तथ्यं स्यात्। यदा तु अनादृतात्मक्षेमाः घातुकाः गुप्तकालाः अतर्कितं प्रहरन्ति, तदा कः सुखी भवेत् ?

रामः— सुमन्त्र, तव मे संशयः। एषा मे निश्चिता मतिः यत् न स कश्चित् तथाविधं वधं प्राप्नोति, यः तं नार्हति, यस्य वा सः न विधिविहितः।

सुमन्त्रः— महाराज, यः निर्विशङ्कं ईदृशस्य अपायस्य भाजनीभवनार्हं आत्मानं वर्तयति स नूनमात्मनो वधाय घातुकान् आह्वयति।

रामः— तर्हि किं मया कर्तव्यं भवानिच्छति, सचिवोत्तम।

सुमन्त्रः— मया प्रार्थ्यमानं सर्वमिदमेव यत् महाराजेन न सर्वेषु कालेषु वीथीसञ्चारः कार्यः। नापि रक्षारहितेन।

रामः— 'रक्षारहितेन' इति कुतो वदसि ? न खलु जातु भवान् रक्षारहितं मां प्रासादात् बहिर्गन्तुमनुजानात्। भवदादेशेन हि प्रत्ययिताः पुरुषाः बहिर्गच्छन्तं मां सर्वदा अन्वसरन्। दूर एव स्थितास्ते

मामन्वसरन्। तेन भवान् विश्वसिति तदहं न जानामीति। सुमन्त्र, किं भवान् मन्यते तन्मे न विदितमिति?

सुमन्त्रः— नाहं जानामि कथं तन्महाराजेन विदितमिति।

रामः— महाराजा अपि चक्षुष्मन्तो भवेयुः। ततः वस्तूनि कदाचित् स्वयं ते उपलभेरन्।

सुमन्त्रः— महाराज, अनुतप्तोऽस्मि। मन्ये महाराजो मां अपराधिनं न गणयति।

रामः— अपराधिनम्? न, सर्वथा न। भवदीयानि अस्थानभयानि अतियतांश्च पश्यन् केवलं अन्तर्हसन्नासम्।

[सीता प्रविशति। रामं सुमन्त्रं च रहःसंवादिनौ दृष्ट्वा तिष्ठति। अथ भाषते]

सीता— कच्चिदहं उपगच्छानि? मन्ये रहः सम्भाषणस्य न मयाऽन्तरायो भवति।

रामः— आं देवि; अत्यन्तं रहस्यं इदं भवति। परन्तु न अयोध्याधिपतेः पट्टमहिष्याः।

[सीता स्मितं कृत्वा उपसृत्य रामस्य पार्श्वे उपविशति]

# ॥ वसुमान्-11 ॥

तत् पश्यन् वसुमान् "इयं ते परिग्रहो भवितुमर्हति। यदीच्छसि, घटनां करिष्यामि" इति सोपहासमिवाब्रवीत्। 'अयि कमलालये' इत्युच्चैः सम्बोध्य "तीर्थं किञ्चिदाहर। अयं मे सुहृत् पिपासुः" इति आदेशमकरोत्। अनेन छलेन तां सन्निधापितवन्तं वसुमन्तं मनसा अभिनन्द्य स युवा अग्रे तिष्ठन्तीं कमलालयां सम्यक्तरां ददर्श। चकमे च तां परिणेतुम्। साऽपि तं समैक्षत। तस्या हस्तात् पानीयं गृहीतवान् वसुमान् "अयं मे अन्तरङ्गसुहृत्। पिपासुः। अतस्ते श्रममदाम्। साधु। याहि" इत्युक्त्वा तां प्रतिप्रेषयामास।

तस्यां अपगतायां हसन् सुदर्शनः वसुमन्तमुवाच— " मम जिह्वायाः पिपासामपदिश्य चक्षुषोः पिपासाशमनसंविधानं अकार्षीः। यदि वस्तुतः कार्यपरोऽसि न परिहासपरः तर्हि घटको भव। उचितां प्रवृत्तिं कुरु। रूपं मे रुचितम्। तव मातुलपुत्री नूनं गुणवती भवेत्। अथवा एवमादि सर्वं न चिन्तनीयम्। त्वं न परं मित्रं, बन्धुरपि भविष्यसीति अस्मिन् सम्बन्धे मम मनः अभिनिविष्टं भवति।"

वसुमान्– प्रियमित्र, अनुरूपयोः वधूवरयोः सङ्घटनं नाम नूनं श्लाघ्यं प्रमोदावहं च कर्म। यदि शक्यं अवश्यमिदमिदानीं करिष्यामि। किन्तु सा प्रबुद्धा कन्या। तस्या हृदयमवगन्तव्यम्। तस्या मातापितरौ स्तः। तयोरनुमतिर्लब्धव्या। इत उपरि साधु परिशीलनीयं अलघु विषयान्तरमस्ति। तयोरधुना अर्थस्थितिर्न समीचीना। क्लिष्टं जीवनं कुरुतः। भवान् लक्षेश्वरः। भवदनुगुणां वैवाहिकीं उपदां सम्भर्तुं तौ न शक्नुतः। अतोऽस्मिन् विषये सविमर्शा मे मतिः।

सुदर्शनः— प्रियवयस्य, गाढेऽपि परिचये न मां त्वं यथावदवगतवानसि। नाहमर्थपरः। काच एकः ताभ्यां वा भवता वा एतदर्थं न व्ययथितव्यः। भगवतः कृपया आढ्यकुले जातोऽस्मि। यन्मे अस्ति तेन सन्तुष्टोऽस्मि। विवाहं निमित्तीकृत्य कन्याकुलात् किमपि लब्धुं न मे वाञ्छा। दृढमेतद् गृहाण। मातुलस्य मातुलान्याश्च भावं जानीहि। तयोः सम्मतौ शोभनस्य कालं देशं च निश्चिनु। कन्या कमनीया। त्वं मे बन्धुर्भविष्यसि। इदमुभयं मे मनः अत्र आसक्तं करोति।

अनतिविलम्बेनैव मातुलान्या मनोरथपूरणाय जातेन प्रसङ्गेन हृष्यन् वसुमान् " सुदर्शन, भवान् मे परमं मित्रम्। मातुल-

पुत्री सद्यो विवाह्या। अतः उभयोः कृते मयाऽत्र उचिता प्रवृत्तिः द्राक् कार्या। करिष्यामि। विस्रब्धो भव।" इत्युक्त्वा आसनादुत्तस्थौ।

सुदर्शनोऽपि उत्थितः "गृहान् गच्छामि। वार्तां प्रेषय। इदमपि बुद्धौ धारय। पूर्वो विवाहो मम महता समारोहेण प्राचलत्। तस्य पर्यवसानं ते विदितम्। अतः भगवत्सङ्कल्पेन अस्मिन् शुभे निश्चिते तदहं आडम्बरं विना परिमितैः बन्धुभिः सह अनतिप्रकटं निर्वर्तयितुमिच्छामि" इति वसुमन्तमुदीर्य तेनानुमतः ततः प्रतस्थे।

# रघुवंशः

## (प्रथमः सर्गः)

अथ कामः, मोक्षः, इति इमौ द्वौ पुरुषार्थौ एकेन श्लोकेन वक्ति—शैशव इति। तत्र 'यौवने विषयैषिणाम्', इति कामस्योक्तिः। विषयाः भोग्यपदार्थाः स्रक्चन्दनगीतवाद्यवनितादयः; तान् ऐष्टुं अभिलषितुं भोक्तुं शीलं येषां ते विषयैषिणः। तेषाम्। भोगेच्छा मनुष्याणां स्वाभाविकी बलवती च। तया निषिद्धमपि आचरन्ति। यथोक्तं भगवद्गीतायाम्—

सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि।
प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति॥

इति। रघुकुलभवास्तु राजानः न भोगेच्छापरवशा बभूवुः। गृहस्था अखण्डभूमण्डलाधिपतयश्च भवन्तस्ते भोगान् बुभुजिर एव। किन्तु शास्त्रैरनिषिद्धान् राज्यकार्याविरोधेन निस्सङ्गेन मनसा बुभुजिरे। जितात्मानस्ते स्वबुद्ध्या विषयान् भोक्तुमैच्छन्। न तु भोगेच्छा इतरानिव तान् आचकर्षेति भावः।

एवं भोगाननुभवन्तस्ते कदा अन्वभवन् ? तदाह— यौवन इति । जातानां मनुष्याणां चतस्रोऽवस्था भवन्ति— शैशवं, यौवनं, वार्धकं, मरणं, इति । आसु द्वितीयावस्थारूपे यौवन एव ते विषयान् भोक्तुमैच्छन् । न तु वार्धकेऽपि । वार्धकेऽपि हि भोगेच्छा अकृतात्मनां अनुवर्तते । आहुश्च— "आशा न जीर्णा वयमेव जीर्णाः" इति ।

अथ मोक्षसिद्धिमाह— योगेनान्ते तनुत्यजाम, इति । अन्ते मरणकाले, योगेन मनः परमात्मनि प्रणिधाय प्राणवायुं सुषुम्नाख्यायां मूर्धन्यनाड्यां प्रवेश्य मूर्धरन्ध्रेण निष्क्रमणेनेत्यर्थः; तनुं शरीरं त्यजन्तीति, तेषाम् । एवं शरीरं त्यजतां मोक्ष उच्यते—

सर्वद्वाराणि संयम्य मनो हृदि निरुद्ध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ॥

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ॥ इति ।

इत्थं द्वितीयावस्थायां भोगभुजः तुरीयावस्थायां मुक्तिभाजश्च ते, इत्युक्तम् । अत्र प्रथमतृतीयावस्थयोः किमकुर्वन् इति प्रश्न उत्तिष्ठेत् । तत्समाधानाभिप्रायेण विद्याग्रहणं मुनिवृत्तित्वं च क्रमेण प्रथमतृतीयपादयोराह । शैशवेऽभ्यस्तविद्यानाम् । ते बाल्ये विद्याभ्यासमकुर्वन् । विद्याविरहे हि धर्माधर्मकार्याकार्यविवेको न भवति । तस्मात् सर्वप्रथमं विद्याभ्यासः कार्यः । तं ते प्रथमावस्थायां यथावदकुर्वन् ।

वार्धके मुनिवृत्तीनाम् । वार्धके मुनीनां वृत्तिं अरण्ये अष्टाङ्गयोगाभ्यासरूपां आश्रयन्ति स्म । एवमभ्यासे सत्येव हि अन्ते योगेन तनुत्यागः सुकरः । तदाह भगवान्—

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परमं पुरुषं दिव्यं याति पार्थानुचिन्तयन् ॥ इति ।

यावत् पुत्राः राज्यभारवहनयोग्या भवन्ति तावत् सिंहासने स्थित्वा महाराजभावोचितान् भोगान् भुक्त्वा ततः परं पुत्रेषु राज्यं विन्यस्य अरण्यं गत्वा योगाभ्यासनिरताः मुनयोऽभवन्नित्यर्थः । 8

ईदृशानां रघूणां वंशं तनुवाग्विभवः सन्नपि अहं वक्ष्ये । यशसे काव्यकरणमस्तु । रघुकुलविषयं तत् काव्यमिति कुत इति चेदाह— तद्गुणैरिति । तेषां रघूणां आजन्मशुद्धिप्रभृतिभिः गुणैः कर्णमागत्य

श्रवणविषयीभूय चापलाय तद्वर्णनरूपसाहसकर्मणे, इदं कर्म कर्तुमिति यावत्, चोदितः प्रेरितः । शास्त्रप्रवचनकाराः पौराणिकाः नाटकाभिनेतारः गायकाः भिक्षुकाः, कालयापनपराः सामान्यजनाः, सर्वे एषामेव इमान् गुणान् सर्वदा सर्वत्र कीर्तयन्ति । अतस्ते गुणाः स्वयं मे कर्णं प्रविश्य
प्रवर्तयन्तीति भावः । 9

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकापि वा ॥ १० ॥

एवं रघुवंशाभिधानकाव्यकरणं प्रतिज्ञाय, तत् किं साधु काव्यं अथवा दुष्टमिति विमृश्य निर्णयं सज्जनाः कुर्वन्तु इति तान् प्रार्थयते—तमिति । तं मया करिष्यमाणं काव्यं रघुवंशं सन्तः अनसूयवः प्राज्ञाः समकालिकाः भविष्यन्तश्च श्रोतुमर्हन्ति शृण्वन्तु । तैः श्रोतव्यमिति प्रार्थय इत्यर्थः । किमर्थं तैः श्रोतव्यमिति चेत् अत्रोत्तरं व्यञ्जयन् तान् विशिनष्टि— सदसदिति । सच्च असच्च सदसती तयोः व्यक्तिः स्फुटावभासः तस्य हेतवः कारणभूताः । सदसद्भावयोः प्रमाणभूता इति यावत् । सामान्यजनाः स्वयं सदसद्वेति निर्णये न प्रभवन्ति । महद्भिः विद्वद्भिः परीक्ष्य सदित्युक्ते सादरं श्रुत्वा कृतार्था भवेयुः । कवेश्च यशो वर्धेत । अतः सद्भिः श्रोतव्यमिति । प्राज्ञा अपि असूयावन्तश्चेत् सदपि काव्यं असद् ब्रूयुः । अतः तद्रहिताः प्राज्ञा इह 'सन्तः' इत्यनेन विवक्षिताः ।

इदमभिप्रेत्य पादुकासहस्रे—

विज्ञापयामि किमपि प्रतिपन्नभीतिः
प्रागेव रङ्गपतिविभ्रमपादुके त्वाम् ।
व्यङ्क्तुं क्षमाः सदसती विगताभ्यसूयाः
सन्तः स्पृशन्तु सदयैर्हृदयैः स्तुतिं ते ॥

इति श्री वेङ्कटनाथेनोक्तम् । असूयाराहित्यमात्रं नालम् । तेन हि विद्यमानान् अविद्यमानान् वा दोषान् अनाविष्कुर्वन्तोऽपि गुणानां ग्रहणे प्रकाशने च उदासीना भवेयुः । अतो रमणीयकाव्यकृत् कविः यशो लभतामिति कवौ, एतत्काव्याध्ययनेन लोकः कार्याकार्यव्युत्पत्तिं लोकोत्तररसानुभवं च लभतामिति लोके च दया आवश्यकी । अत आह श्रीवेङ्कटनाथः— सदयैर्हृदयैरिति । तर्कसंस्तवप्रयुक्तां कर्कशतां दूरे विहाय सुकुमारवृत्तिशालिन्या मत्या सेवनीयं काव्यमित्यभिप्रायेण स्पृशन्त्विति ।

सतां सत्काव्यासत्काव्यव्यक्तिहेतुत्वे दृष्टान्तमाह — हेम्न इति । हेम सुवर्णम् । तस्य विशुद्धिः श्यामिका अविशुद्धिर्वा अग्नौ संलक्ष्यते हि स्फुटमीक्ष्यते खलु । सुवर्णमिति आपातप्रतीतिर्भवति । वस्तुतः तत् सुवर्णं अथवा सुवर्णाभास इति अग्नौ तत्प्रक्षेपेण ज्ञायते । इत्थं यथा अग्निः सदसत्सुवर्णव्यक्तिहेतुः तथा सन्तः सदसत्काव्यव्यक्तिहेतवः ।

एवं दशश्लोकात्मकमिदं उपोद्घातरूपमेकं प्रकरणम् । अथ दिलीप-महाराजवृत्तान्तः प्रतिपाद्यते । तत्र प्रथमं तत्स्वरूपस्य गुणानां राज्यस्य 10
च वर्णनं विंशता श्लोकैः करिष्यते ।

---

# विकटवाक्

(बालविभागः) (18—3—62)

## १. अध्यापकस्य तपः ।

चरित्राध्यापकः कक्ष्यायां माणवकान् अध्यापयितुं प्रवृत्तः कृष्णफलके 'चरित्रम्' इति यावल्लिलेख तावत् निद्रोपनिपातकलुषो बभूव । आसने उपविश्य यथाशीलं नेत्रे न्यमीलयत् । तदा दौर्भाग्यवशात् प्रत्यवेक्षकः कक्ष्यां प्राविशत् । माणवकाः इतिकर्तव्यतामुग्धाः सम्भ्रमदृष्टिं कुर्वन्तोऽवर्तन्त । पादरक्षाशब्दश्रवणात् उन्मीलितनयनोऽध्यापकः क्षणं विभ्रान्तो भूत्वा "बालाः, इत्थमेव बुद्धः वृक्षमूले तपश्चकार" इति वदन् उत्तस्थौ ।

एम्. कण्णन् ।
मदुरा

# प्रकृतिभेदः

(1)

देशान्तरी— सौम्य, कः खलु सरितः पन्थाः ?

प्रथमः— (असकृत् पृष्टोऽपि उत्तरमददत् तूष्णीं याति)

दे— अये ! किन्तु ते वाचो मुक्ता निष्पतिता भविष्यन्ति, येन तां नोद्घाटयसि ।

(2)

दे— सौम्य कः खलु सरितः पन्थाः ?

द्वितीयः— (सक्रोधं) को न्वार्य भवान् ? किमस्माकं पान्थानां मार्गकथनमेव कर्म, न कार्यान्तरमस्ति ? यदि मार्गो न ज्ञायते तर्हि आवासस्थान एव स्थातव्यम् । कुतो बहिर्भ्रमन् अस्मान् उपद्रवसि ?

दे— आर्य, क्षाम्यतु भवान् । अज्ञानादप्राक्षम् ।

(3)

दे— सौम्य, कः खलु सरितः पन्थाः ?

तृतीयः— किं भोः ? सरितः पन्थाः ? इतः पश्य । अस्यामेव वीथ्यां दीर्घं गत्वा दक्षिणतः वीथ्यन्तरं द्रक्ष्यसि । तेनैव ऋजु गच्छ, इतस्ततः अपरिवर्तमानः । तत् त्वां सरितं नेष्यति ।

चतुर्थः— आर्य, अहं ते सरितं दर्शयिष्यामि । मामनुगच्छ ।

दे— (सहर्षम्) सौम्य, यदि ते न कार्योपरोधः तर्हि तथा कुरु । शतायुर्भव ।

# पुस्तकपरामर्शः

श्री देशिकदिग्विजयः । श्रीमदहोबिलमठत्रिचत्वारिंशपट्ट-मूर्धाभिषिक्त श्रीवीरराघवशठकोपयतीन्द्रमहादेशिकविषयकः । विद्याभूषण व्याकरणशिरोमणि चिलुक्कूर् श्री वेङ्कटराघवाचार्य-विरचितप्रकाशितः ।

विद्वान् कविश्च भवन् श्री वेङ्कटराघवाचार्यः आचार्यवर्यस्य पट्टाभिषेकसमनन्तरमेवोपक्रान्तां यात्रां ललितविशुद्धपदसन्दृब्धैः षट्चत्वारिंशदधिकशतश्लोकैः अस्मिन् निबन्धे वर्णयन् स्वकीयं आचार्यभक्तिप्रकर्षं परिवाहयति ।

## ॥ श्री लक्ष्मीपञ्चाशत् ॥

विद्याभूषणं, चिलुक्कूर् मा. वेङ्कटराघवाचार्यः, शिरोमणिः

त्वदपकृतिमाचरन्तः पिशिताशास्तेऽपि किं दयापात्रम् ।
अनिलात्मजेन नासन्निवार्यमाणा अशोकवनिकायाम् ॥ ३४ ॥

अप्यस्ति सापराधे कारुण्यं ते जने रमे मातः ।
दुष्टकुचापि हि जननी बालं स्तन्येन पोषयत्येव ॥ ३५ ॥

धन्यो भवेत्स सद्यो यं त्वं कमले निरीक्षसे जन्तुम् ।
अज्ञोऽतः कलये त्वां मातर्विज्ञानसम्भृतं कुरु माम् ॥ ३६ ॥

नालं स्तोतुमहं त्वां तथापि मातस्त्वदीयगुणबृन्दम् ।
मुखरयति मामकीनां जिह्वां त्वत्कीर्तनान्न वृत्तां मे ॥ ३७ ॥

continued His discourse about *bhakti* in the ninth chapter which he opens addressing Arjuna thus:

> But this most secret thing I am going to teach you, you being *unenvious.*

Krishna here once again dwells though in a slightly different manner, on His greatness.

(*b*) He adds that his transcendent excellences, His greatness, is in no way affected when he is in the human form. He continues to be the Supreme Being even then, though ignorant men, not knowing it, despise Him.

(*c*) Krishna also praises once again here His devotees, those divotees whose only object is to attain Him, to be always in communion with Him. "I look after the welfare and prosperity," Krishna declares, "of all those who, meditate exclusively on Me and worship Me." "Whatever is offered to me by one with loving devotion, be it some leaf, flower, fruit or water, I eat it of that pure soul." "Even a profligate that worships me with one-pointed devotion is a respectable one; he will soon turn a virtuous man."

(*d*) It is said in the Sangraha sloka that what *bhakt-yoga* is, is indicated by the last *sloka* of this chapter. Bhakti takes many forms—constant meditation, worship, prostration. But the most important element in *bhakti* is intense love. When it develops to the point of overflowing it takes the forms just mentioned. If there is a moment which passes without remembering Him the devotee would consider it a very great loss to him, feeling quite uneasy and restless. Such deep fascinating love makes what is called *bhakti*.

10. It has been indicated that Arjuna was not at all critical or sceptical of what Krishna said about Himself.

[उद्यानपत्रिका XXXIV 9-10

On the contrary he sincerely believed in all that he heard form Krishna. Not only that. He was very much pleased to listen to Krishna explaining to him the truth about Himself. All that, was very interesting to him. He relished all that. He looked as if anxious to know *bhakti* so fully and so thoroughly as to be able to practise it. Krishna appreciated the enthusiasm and interest evinced by Arjuna in receiving the instruction He was imparting to him and was much pleased. So, expressing in the following words His appreciation of the proper and commendable manner in which Arjuna received His instruction, "Listen further, O Arjuna; I shall speak words of highest import to you who are delighted with my instruction".—Krishna told Arjuna that he who knows Him as One that possesses endless good qualities and as One that controls the universe would undoubtedly attain the *yoga (bhakti)* and would be firm in it. The idea is that the two facts concerning God, that He is the possessor of all good qualities and that He is the sole controller of the whole universe, in other words His qualities and His possessions, *yoga* and *vibhuti*, when fully understood, would lead one to acquire and develop *bhakti yoga*. Arjuna noted the point emphasized by Krishna and expressing, in his turn, his belief in all that he was taught so far and his profound gratefulness to Him for the enlightenment, wanted to know particularly the things in which God should be known as existing as their controller, his *vibhutis*, and accordingly implored Krishna to explain the point in greater and fuller details. As Krishna was in a mood to condescend to any thing that Arjuna asked, He readily began to enumerare his *vibuthis* (possessions), saying repeatedly that He would confine himself to some prominent and important things since the list could never be an exhaustive one. The first to be mentioned in the given list which itself is a fairly long one is Vishnu of the

group gods, namely, Adityas, and the last 'the knowledge of knowers:'— *jnanam jnanavatamaham.* This is followed by some general statements, the first of which means.— 'I am the seed of all beings: there is nothing which could exist without Me".

Thus this chapter refers to the auspicious qualities and enumerates the important *vibhutis* (possessions) of God in order that *bhakti* may happen and develop in Arjuna (and such others).

11. The next chapter, the eleventh, opens with Arjuna's words. He was thoroughly moved by Krishna's discourses on soul and Himself. He became overwhelmed by feelings of reverence and gratitude and fear towards Krishna, The strong conviction about the transcendental nature of Krishna, which Arjuna had as the result of His able, kind. convincing and delightful teachings, brought about a longing in him to have a direct perceptional experience of it, *i,e.*, to see it with his own eyes if possible. Consequently he said to Krishna with profound submissiveness and humility;

> "The colossal and stupefying ignorance of mine is gone due to instruction you have given for my good, in the subtle *adhyatma* (the nature of the soul). I have also learnt from you that the world emerges from You and it merges back in You at the end. I have been also made fully aware of your greatness. Now I want to see You as Isvara (as the controller and supporter of the universe) in case You think that it is possible for me to do so".

Krishna obliged him unhesitatingly, immediately saying "See my forms in hundreds and thousands." With the help of the divine sight provided by Krishna Arjuna saw, enjoyed and praised Him in the *Visvarupa* form. But

SRI VENKATESWARA ... INDRIYA SANSKRIT VIDYA PEETHAM TIRUPATI ... LIBRARY

subsequently he got terrified and requested Him to assume his natural form as Krishna. He did so and consoled him at the end that it is only through *bhakti* and nothing else that one could understand and see and attain Him.

12. *(a)* In the last five *adhyayas* (7—11) *bhakti yoga* was dealt with elaborately. Arjuna found himself in a position to think that he knew all about it. Now he remembered the *jnana yoga* taught in the last chapters of the first shatka, when an idea crossed his mind as to which of the two *yogas* was quicker in yielding its respective result. He put the question to Krishna who replied that *bhakti* is so. He added that *jnana* is very difficult of practice while *bhakti* is not only not so, but very pleasant.

(*b*) Krishna then told Arjuna that those who are incapable of doing *bhakti* at once may have mental exercises, making their mind think of Him constantly with deep love and devotion. Those that are not able to do even this may do some service to Him such as building temple, growing flower garden, burning lights, sweeping, washing, supply of flowers, making provision for worship, uttering his names, perambulation (*pradakshina*), praising and bowing.

(*c*) When somehow or other one fails to have and develop such love towards Him as would prompt one to render and relish any of the services mentioned above one may achieve *bhakti* through *karmayoga* resulting in soul-experience taught in the first shatka. This purifies the mind and with mind so purified one is fit for practising *yogas* effectively.

(*d*) There is no salvation without *bhakti* and the first and comparatively the easiest among the steps to be taken to attain *bhakti* is *karmayoga*. Almost all men that

Registered No M 2300.

Book XXXIV || श्रीः || Nos. 11-12

# उद्यान पत्रिका

नाम

## ॥ संस्कृतमासपत्रिका ॥

—:o:—

ये संस्कृतप्रियाः सन्तस्तेषां सद्मनिसद्मनि ।
उद्यानपत्रिका नित्यं विहर्तुमियमिच्छति ॥

पु. ३४] कलि ५०६४ – शुभकृत् कटक-सिंहौ [सं ११-१२

# THE UDYANA PATRIKA

A

SANSKRIT MONTHLY

July & August 1962.

In case you have not received the previous number please inform the Editor or Publisher immediately.

For the rate of subscription please see inside

# UDYANA PATRIKA.

Annual Subscription: Rs. Three only.
Foreign Twelve Indian Rupees.

## उद्यानपत्रिका ॥

१ अस्या वार्षिकं मूल्यं त्रीणि रूप्याणि ।
२ ग्राहकीबुभूषद्भिर्दयया प्रथममेव मूल्यं प्रेषणीयम् ।
३ वर्षमध्ये ग्राहकीभवतामपि कन्यासङ्क्रिकादिरेव पत्रिका प्रेष्येत ।
४ एतत्पत्रिकालक्ष्याविरोधेन सरलविशदं विलिख्य प्रेष्यमाणा लेखाः ससन्तोषं प्रतिगृह्य प्रकाश्येरन् । गद्यरूपेषु अधिकतर आदरः ।
५ प्रकाशयितुमिष्टा लेखाः साक्षात् निर्वाहकसम्पादकाय प्रेषणीयाः ।
६ एतत्सम्बन्धिनोऽन्ये सर्वे व्यवहाराः मुद्रणकारेण साकं कर्तव्याः । (संस्कृतेन आङ्गल्या द्राविड्या वा न तु भाषान्तरेण । )
७ लेखप्रतिलेखेषु अवश्यं स्वस्वसङ्ख्या निर्देष्टव्या ।

निर्वाहकसम्पादकः *Mimamsarnava Mimamsakesari, Panditaraja* D. T. Tatacharya Siromani, M. O. L.
TIRUPATI

मुद्रणकारः— S. Vijayaraghavan,
*Proprietor*, The Srinivasa Press,
Thiruvaiyaru P. O., Tanjore Dt.

## विषयाः ॥

1 मीनाक्षीशतकम् ।
2 आर्जवम् ।
3 रामराज्यम् ।
4 रघुवंशः ।
5 वसुमान्-12
6 पुस्तकपरामर्शः ।
श्री गीतार्थदीपः २३७–२४०.

कृषिमिव नष्टामन्ते शापग्रस्तामिवामलां विद्याम् ।
कथमिव विषहेऽरंस्ते सङ्कल्पारोहणीं भग्नाम् ॥ ४६ ॥

जयिनो विप्रा वर्णेष्वेतेष्वपि विद्वदन्वये जाताः ।
तेष्वपि दीक्षितवंश्याः सर्वस्यैकोऽपवादोऽहम् ॥ ४७ ॥

चतुरधिकशतप्रबन्धप्रणेतुरभ्यर्हिताभिधानस्य ।
विद्यागुरोः कुलीनो विद्वद्गोष्ठीषु मूकोऽस्मि ॥ ४८ ॥

राजाधिराजवन्दितचरणान् पूर्वेषु विगणयन्विदुषः ।
धिग्जननि निष्प्रभावः किं भूविवरे न लीयेऽहम् ॥ ४९ ॥

अध्वरशतकृतदीक्षान् सन्मार्गाणां निदर्शकान् लोके ।
स्मृत्वा तानपि पूर्वान् नीचपथे पर्यटाम्यम्ब ॥ ५० ॥

भूलोकविधातारः सर्वसभाग्रेसराः प्रवक्तारः ।
पूर्वे कुलप्रदीपा लज्जेरन् वंश्यमीदृशं दृष्ट्वा ॥ ५१ ॥

चिन्ताभारं दातुं सञ्चितमर्थं विनाशयितुम् ।
कुलनाम विसंवदितुं कस्मिन् योगे प्रजातोऽहम् ॥ ५२ ॥

सत्त्वप्रभावहीने मय्याश्रयनाशनेऽपि यद्गुरवः ।
प्रणयकरम्बितमनसस्तन्मे मर्माणि घट्टयति ॥ ५३ ॥

उत्प्रेक्षितानि तेषां वितथीकुर्वन्निजौजसा हीनः ।
स्वस्यापि लज्जमानो जीवन्मरणं ह्यनुभवामि ॥ ५४ ॥

आयुः कियदतिपतितं विद्या वित्तं यशो न किञ्चिदपि।
केवलमार्जितमेतद्वपुषि स्थौल्यं च मौर्ख्यं च॥ ५५ ॥

निरुपकृति वन्ध्यमेतज्जीवितमिति को विवर्जितः सङ्गः।
तत्र प्रभवति मातर्देवी निर्लज्जता किल मे॥ ५६ ॥

कुलमानबाह्यशोभाऽनुरूपमुत्प्रेक्ष्य मयि जनः शौर्यम्।
दृष्ट्वा प्रयोगकाले प्रयततः किं न हासमुपरुन्धे॥ ५७ ॥

नार्थकरी न च संसदि शोभां धत्ते चिरार्जिता विद्या।
नान्तः शुष्यति विधृताऽप्यूषरभूमौ यथा बीजम्॥ ५८ ॥

विद्यापरिश्रमो मे त्रेधा वन्ध्यो मनो निपीडयति।
प्रसवव्यथाऽतिगुर्वी न सूयते स्त्री पुमान् वाऽन्यत्॥ ५९ ॥

कृच्छ्रेण लम्भयित्वा गुरवो मामर्थसाधनीं विद्याम्।
न तयाऽपि चोत्तरन्तं दृष्ट्वा किं नो जुगुप्सेरन्॥ ६० ॥

केचित्स्वयमुत्तीर्णाः केषाञ्चित्सूच्यते पुरो मार्गः।
स्कन्धादुपरि धृतोऽपि प्रपतेद्यदि कस्तमुद्धरतु॥ ६१ ॥

सवयस्सु जातपक्षेष्वभितो विहरत्सु लोकमाक्रम्य।
च्युतपक्षो रुग्णपदः कुण्ठितचञ्चुर्विषीदामि॥ ६२ ॥

दुर्भागधेयमलसं विक्लबमसमर्थमस्थिरं मूर्खम्।
उत्साहशक्तिविधुरं निस्सत्वं रक्ष मामम्ब॥ ६३ ॥

दृष्टे मयि सरला अपि भवन्ति विमुखाः सशङ्कमुद्विग्नाः।
प्रकृतिमतिक्रामयति प्रबलो मम दुर्विधिर्लोकम् ॥ ६४ ॥

संव्यवहरन्त एव प्रणयिजना मामुदासते काले।
गूढं जुगुप्समानाः कुलबहुमानं बहिः प्रशंसन्तः ॥ ६५ ॥

सन्नेष भक्तिमानिति सहृदय इति कस्य जायते प्रीतिः।
निखिलगुणरञ्जनाञ्जनमस्ति न चेदायतिर्विपुला ॥ ६६ ॥

गुणगणरसिकोऽपि जनो रहसि मयि प्रेम बिभ्रदतिशयितम्।
सङ्घेषु पृष्ठतो मां कृत्वा सद्भाग्यमनुसरति ॥ ६७ ॥

अर्थैः समुपेतोऽहं तदितरगुणवर्जितो यदि भवेयम्।
नैवं मामवमन्तुं ह्येते सुहृदः प्रगल्भाः स्युः ॥ ६८ ॥

न गुणानभिज्ञता तन्न च कार्यार्थं बहुच्छलं प्रेम।
लोकानुवर्तन हि प्रायः पुंसां सुदुर्निरसम् ॥ ६९ ॥

अनुवर्तन्ते लोकं घटमानाः सत्सु चाप्यसत्स्वेते।
तावत्यसमर्थो यदि किमर्थमेतान् परिवदामि ॥ ७० ॥

अम्ब मम दैन्यभारं जानत्यपि सर्वसाक्षिणी भवती।
मामेवमुपेक्षत इति कास्तु कथाऽन्येषु मित्रेषु ॥ ७१ ॥

न तवास्ति कृत्यमितरैर्लोकस्तु त्वत्कृपापराधीनः।
ऋद्धेषु पक्षपातस्तवापि चेद्धन्त नष्टाः स्मः ॥ ७२ ॥

दीनस्यानाथस्य च मातः को भवतु रक्षिता लोके ।
मीनायतनयनायास्तवापि तस्मिन्नवज्ञा चेत् ॥ ७३ ॥

दुर्भगजनप्रसङ्गं लोक इव त्वमपि किं नु खलु मातः ।
लाघवहेतुं मनुषे यदेवमनुम्पसे नेमम् ॥ ७४ ॥

परिपतति दृष्टिरुच्चैःपदेषु नृणामिति स्वभावोऽयम् ।
नीचैः स्थितान् विवेक्तुं कस्यावसरः पुमर्थः कः ॥ ७५ ॥

किं नु खलु सैव रीतिस्तवापि दीनेषु साम्प्रतं मातः ।
यस्याः प्रथते कीर्तिः त्रिजगन्माता दयार्द्रेति ॥ ७६ ॥

यदि शक्तीनामवधिर्निखिलैश्वर्यप्रसूतिरपि च यदि ।
यदि तव भूतेषु दया कः स्यादस्मत्परः पात्रम् ॥ ७७ ॥

अम्ब तव दृष्टिकोणात्करुणामृतपूर एव यदि वहति ।
तस्य खलु नीचदर्शं निसर्गतो युज्यते पातः ॥ ७८ ॥

पत्युः समीपगायाः शालीनतया विनम्रवदनायाः ।
चटुला दृगन्तपाता निम्नेऽपि मयि प्रवर्तन्ताम् ॥ ७९ ॥

यादृच्छिकाक्षिवलनप्रभानुलेपेन विरहितः किञ्चित् ।
कियदस्मि निम्नपतितः कस्यास्मि पुरो मनुष्य इव ॥ ८० ॥

अविरलचपलोऽपाङ्गः कुवलयमुल्लासयन्निवानुदिशम् ।
पुरतः स्थितमपि कस्मात् कलयापि च मां न लक्षयति ॥ ८१ ॥

॥ उद्यानपत्रिका ॥

"अन्या वाचो विमुञ्चथ"

वेदापहारविक्रोशद्वेधः खेदविमर्दिनम् ।
पण्णातीरपरिष्कारं पारिजातमुपास्महे ॥

पु ३४] कलि ५०६४ शुभकृत्-कटक सिंहौ [सं ११-१२
(1962-July-August)

# आर्जवम्

काश्मीरदेशः महाराजस्य अभ्यर्थनया प्रजानां सम्मत्या च अस्मदीयेन भारतदेशेन सङ्घटितो बभूव ।

तं स्वयमपेक्षमाणाः पाकिस्थानिनः प्रत्यन्तवासिनो जनान् स्वकीयान् सैनिकांश्च प्रेष्य बलात्कारेण आक्रम्य तस्य तृतीयं भागं स्ववशे अकुर्वन् ।

शमप्रधानाः अस्मदीयाः राष्ट्रपालकाः बलमुपयुज्य तान् विद्रावयितुमनिच्छन्तः 'समितदेशपरिषदं' उपेत्य व्यवहारमकुर्वन् । त्रयोदशाधिकेभ्यो वर्षेभ्यः पूर्वमिदं वृत्तम् । अद्यापि स व्यवहारो नावसितः ।

अत्र कारणं पाकिस्थानपक्षपातिनां प्रबलानां केषाञ्चित् पश्चिमदेशानां अनार्जवमेव ।

आक्रमणकाराः अत एव अपराधिनः पाकिस्थानिन इति ते सर्वे असन्दिग्धं सम्यग् जानन्ति ।

ते यदि न्याये दत्तदृष्टयः सन्तः "आक्रमणं विहाय बहिरागन्तव्यम्" इति पाकिस्थानिनः सनिर्बन्धं ब्रूयुः तदतिलङ्घने इमे न धृष्णुयुः, सद्यो बहिर्गता भवेयुः ।

पाकिस्थानिषु दाक्षिण्यं दर्शयन्तः ते तथा तान् न वदन्ति । चोरतुल्यान् तान्, अपहृतवस्तुस्वामितुल्यान् अस्मदीयांश्च समानानिव भावयन्तः धर्मं शर्म च उपदिशन्त इव किमपि तदा तदा भाषमाणा वर्तन्ते ।

अन्तः अपराधिषु पक्षपातः, तेन न्याय्यकरणपराङ्मुख्यं च, बहिर्धर्मोपदेशः, इति आर्जवहानिरत्र महती ।

तेषां साहाय्ये दृढप्रत्ययाः पाकिस्थानिनः उत्तरोत्तरं कुटिलमेव पन्थानमनुसरन्तो वर्तन्ते।

न वयं राष्ट्रविषयचिन्ताप्रवणाः। तथापि अनार्जवं प्रत्येकजन इव समूहेष्वपि दृश्यमानं महते अनर्थाय कल्पेतेति भिया इदं वक्तुं प्रवृत्ताः।

यदि वस्तुतो लोकक्षेमपराः, तर्हि इदं अनार्जवं अत्यन्तं धूत्वा, न परं स्वयं, अपि तु लोके सर्वेऽपि यथा आर्जवैकनिष्ठा भवेयुः तथा कमप्युद्यमं कर्तुमर्हन्ति।

# रामराज्यम् ॥

(उत्तमस्य राज्यस्य उत्तमो राजा)

वि. वि. श्री.

## द्वितीयेऽङ्के चतुर्थं प्रेक्षणकम्

[रामः सुमन्त्रश्च परस्परं अवेक्षमाणौ क्षणं तूष्णीं वर्तेते। इदं पश्यन्ती सीता भाषते।]

सीता— एकान्तसम्भाषणस्य अन्तरायो वस्तुतो मया अजनीति भाति।

रामः— प्रिये, नैव। भवत्यां प्रविशन्त्यां आवयोः सम्भाषणं अवसितमभूत्। अयं अस्मत्सचिवोत्तमः मामनुशास्ति— इतःपरं कञ्चित्कालं मया अयोध्यायां रात्रौ प्रासादाद् बहिः सञ्चारो न कर्तव्य इति। एष किल श्रुतवान् कश्चन राक्षसः—रावणस्य पौत्रः—मां हन्तुकामः लङ्कातः इह आगत इति।

सीता— किं किम्! तथा नु तत्! मम मतिरासीत् लोके एकोऽपि शत्रुरस्माकं नास्तीति। किमिदं तथ्यम्?

सुमन्त्रः— इयं वार्ता मया लङ्काधिपतेः साक्षाद् विभीषणादधिगता।

सीता— तथानु! एवं चेत् नूनं अस्मत्प्रभुणा अत्यन्तं जागरूकेण भवितव्यम्।

सुमन्त्रः— इदमहं याचामि— महाराज्ञया तथा कर्तव्यं यथा इतःपरं कञ्चित् कालमपि वा महाराजः निशि एकाकी बहिर्न गच्छति।

सीता— नियतं तथा करिष्यामि । चक्रवर्तिनीं मां आर्यपुत्रोऽभिधत्ते । मन्ये चक्रवर्तिन्यपि आज्ञां दातुमर्हति ।

रामः— चक्रवर्तिनेऽपि ?

सीता— आम; तथा । कुतो न । तस्मै एकस्मा एव तावत् प्रथमतः ।

रामः— (उत्थाय मिथ्याविनयमभिनयन् सीतायाः पुरतः अवनम्य) यथा चक्रवर्तिन्यै रोचते ।

सीता— नूनं तथा । इयं चक्रवर्तिनी प्रत्येति— यत् सचिवोत्तमः सुमन्त्रो वदति तद् बुद्धिमद्वचः । अस्माद् दिनात् प्रभृति भवता प्रासादाद् बहिः रक्षां विना एकाकिना न गन्तव्यम् ।

रामः— (धूर्तस्मितं कुर्वन्) कुरु तावत् इयमाज्ञा न परिपाल्यते । ततः किं भवेत् ।

सीता— किं भवेत्? दण्डितो भविष्यसि; यथा अन्यः कश्चिदपराधी, यो न्याय्यामाज्ञामतिलङ्घते ।

रामः— दण्डितः! कथम् ? केन ?

सीता— अयोध्याचक्रवर्तिन्या, क्लिष्टेन कारावासेन ।

रामः— क्लिष्टेन कारावासेन ? किंरूपः स भविष्यति ?

सीता— प्रेममयीभिः स्वर्णशलाकाभिः निर्मितस्य आवरणस्य अन्तः तीक्ष्णैः नेत्रैः प्रत्यवेक्ष्यमाणस्य सुप्रसारिताभ्यां बाहुभ्यां अवरुद्धतया अवस्थानं तत् ।

रामः— तथाविधमिदं कारागृहं, यस्मात् रावणं हतवता महावीरेणापि आत्मा दुर्मोचः ।

[बहिः महान् कलकलरवः । एकान्तगृहस्य कवाटे झटिति विघटेते । एकतः हनूमान् अपरतो लक्ष्मणश्च कञ्चन राक्षसयुवानं दृढं करे गृहीत्वा आनयन्तौ प्रविशतः । ]

रामः— आः मन्ये अयं स विश्वजित् यमधिकृत्य अद्य सुमन्त्रोऽभाषिष्ट । (हनूमन्तं दृष्ट्वा) अपि नाम मम नेत्रे विश्वसनीये । कच्चिन्मम मित्रं स एव आञ्जनेयस्त्वम्? कथमत्र आगमः ? ह्य एवाहं अश्रृणवम् किष्किन्धां परित्यज्य त्वं तपसे हिमालयं गत इति ।

हनूमान्— तपसेऽहं किष्किन्धां अत्यजमित्ति सत्यमेतत् । परं तु न हिमालये । अत्र विस्तरमहं पश्चात् करिष्यामि । कच्चित् महाप्रभुर्वेद कोऽयं बटुः, कोऽयं राक्षस इति ?

रामः— अस्य नाम विश्वजिदित्यहं तर्कयामि ।

विश्वजित्— तन्मे नामधेयं, सर्वसम्मान्य महाराज ।

रामः— (कतिपयक्षणान् राक्षसं समवलोक्य ततः हनूमल्लक्ष्मणौ प्रति) तस्मात् हस्तौ अपरहतम् ।

(तौ अन्योन्यमभिवीक्ष्य अनिच्छयैव ततो हस्तमपनीयापि तस्मिन्नेव दत्तदृष्टी तिष्ठतः । )

रामः— त्वं किल तस्य महतः सङ्ग्रामशूरस्य इन्द्रजितः पुत्रः ?

विश्वजित्— मां प्रति प्रागेव सर्वं जानाति महाराज इति प्रतीयते ।

रामः— प्रायो न सर्वम् । इदं ज्ञायते यत् त्वं मां हन्तुं अयोध्यामागत इति । तथा नु तत् ?

विश्वजित्— महन् महाराज, परमार्थतः स एव साक्षान्मम हृद्गतो भावः अस्यां अयोध्यानगर्यां प्रवेशात् प्राक् । अस्यां आश्चर्यायां दिव्यनगर्यां प्रवेशानुपदं तु ममोद्देशः अध्यवसायश्च विलीनावभवताम् । निर्देष्टुमशक्येन केनापि हेतुना स मे दुस्सङ्कल्पः तिरोबभूव । अहं च लङ्कां प्रति प्रयातुमैच्छम् । परन्तु इयं मे मतिरुदभूत् यत् इयद् दूरमागतेन मया, यो मे महान्तं पितामहं रावणं, महत्तरं तस्य पुत्रं मम पितरं इन्द्रजितं च हतवान् स महावीरः सकृद् द्रष्टव्य इति ।

---

विकटवाक् । (बालविभागः) (18—3—62)

## २. विनोदगणितम् ।

(1)

एतद्गृहे द्वादश फलानि सन्ति । द्वादश बालाः तानि एकैकशो गृह्णन्ति । अन्ते तस्मिन् एकं फलं वर्तते । कथम् ?

(2)

अजपालः कश्चित् । तं कश्चिदपृच्छत्— तव समजे कति अजाः सन्तीति । स प्रत्यवोचत्— 2, 3, 4, 5, 6. आसु यया कयाऽपि सङ्ख्यया विभजने एकमवशिष्येत । तावन्तोऽत्र अजा इति । कति ते ?

[उत्तरमनन्तरसञ्चिकायाम् । ]

# रघुवंशः

## (प्रथमः सर्गः)

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ॥ ११ ॥

प्राज्ञानां पूजनीयः, मनुरिति प्रसिद्धः, विवस्वतः सूर्यस्य पुत्रः महीक्षितां राज्ञां आद्यः प्रथमः आसीत्। प्राज्ञैः पूज्यमानः प्रणवः छन्दसां वेदानां प्रथमः यथा, तथा।

अथवा मनीषिणां माननीयः प्रणवः वेदानां यथा आद्यः तथा मनीषिणां माननीयः राज्ञामाद्यः मनुनामा विवस्वतः पुत्र आसीदित्यन्वयः।

वैवस्वत इत्यनेन सूर्यस्य वंशप्रवर्तकत्वं "क्व सूर्यप्रभवो वंशः" इति पूर्वोक्तमनुसंहितम। "महीक्षितामाद्यः" इत्यनेन "आसमुद्रक्षितीशानां" इत्यादिभिः पूर्वं व्यञ्जितं राजवंशत्वमनुसंहितम। सूर्यो देवः। तस्मादुत्पन्नः कश्चन राजवंशः यत्र प्रथमो राजा मनुरिति ज्ञेयमिति भावः। यथा वेदाः तथा अभ्यर्हिता धार्मिका राजानः। लोकहितप्रावण्यस्य समानत्वात्। वेदानां सर्वेषां आदौ भवः प्रणवः। एतन्मूलत्वात् तेषाम्। कृत्स्नाक्षरसमाम्नायसमष्टिरूपः प्रणवः। वर्णोत्पत्तिस्थानेषु प्रथमः कण्ठः। तत्रोत्पद्यमानः अकारः प्रथमो वर्णः। ओष्ठः अन्तिमं स्थानम्। तत्र भवो मकारः। इमौ अकारमकारौ प्रणवस्य आदौ अन्ते च वर्तमानौ प्रत्याहारनीत्या तस्य सर्ववर्णात्मकतां गमयतः। मध्ये विद्यमान उकारः अकारमकारव्यतिरिक्तानां सर्वेषां वर्णानामुपलक्षकः सन् प्रणवस्य तद्गर्भतां स्फुटयति । एवं सर्ववर्णात्मकः प्रणवः। अतः वर्णराशिरूपाः वेदाः प्रणवमूला इत्येतत् सुज्ञानम् ।

यथैव सर्ववेदमूलकारणत्वात् प्रणवस्य आद्यत्वं तथा इक्ष्वाकुप्रभृतीनां राज्ञां मूलकारणत्वात् मनोराद्यत्वम। भगवद्वाचकोत्कृष्टमन्त्ररूपत्वात् यथा तस्य प्राज्ञमान्यत्वं तथा सर्वधर्मज्ञत्वात् धर्मनिष्ठत्वात् सर्वधर्मोपदेष्टृत्वाच्च मनोरपि तत्।

वैवस्वतो मनुः इत्याभ्यां पदाभ्यां

"इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह"

इति भगवद्गीतोक्तिं स्मारयन् कविः अत्यन्तगूढकर्मयोगविषये भगवतः प्रशिष्यतयाऽपि मनोर्माननीयत्वं व्यञ्जयति ॥ 11

**तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।**
**दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ॥ १२ ॥**

शुद्धिमति परमपवित्रात् सूर्यादुत्पन्नत्वेन, तत्र जातानां सर्वेषां यथाविधि निषेकादिसकलसंस्कारसम्पन्नत्वेन पापकर्मणां अत्यन्तवर्जनेन पुण्यकर्मनिरतत्वेन च परिशुद्धे तस्य सूर्यपुत्रस्य प्रथमक्षत्रियस्य मनोर्वंशे शुद्धिमत्तरः सर्वपूर्वपुरुषापेक्षया अधिकतरपरिशुद्धिमान् दिलीप इति दिलीपनामा, राजेन्दुः राजश्रेष्ठः क्षीरसमुद्रे चन्द्र इव प्रसूतः जनितः । जात इत्यत्र तात्पर्यम् । यद्वा स्वमातापितृभ्यां महता तपसा भगवन्तमाराध्य तत्प्रसादेन उत्पादित इति भावः ।

श्रोत्रियस्य पुत्रः स्वयमपि श्रोत्रियो भवति चेत् पितुरपेक्षया पुत्रस्य शुद्धिरधिका भवति । पितृशुद्धेः स्वशुद्धेश्च उभयोस्तत्र मेलनात् । पुत्रस्य पुत्रोऽपि श्रोत्रियश्चेत् तस्य शुद्धिस्ततोऽप्यधिका । तिसृणां शुद्धीनां तत्र मेलनात् । एवमुत्तरोत्तरं द्रष्टव्यम् । अनया रीत्या 'तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः' इत्युक्तं दिलीपस्य शुद्ध्याधिक्यं प्रतिपत्तव्यम् ।

क्षीरार्णवः अतिस्वच्छत्वात् शुद्धः । तत्र जातस्य चन्द्रस्य कान्तिमत्त्वात् ततोऽपि वैशिष्ट्यम् ।

यद्यपि रघुवंशवर्णनस्य प्रतिज्ञातत्वात् रघोरेव स्वरूपस्वभावादिकं प्रथमतः प्रतिपाद्यम्; अथापि रघोः "आजन्मशुद्धानां" इति पूर्वमुक्तम् आजन्मशुद्धत्वं व्यञ्जयितुं दिलीपचरितमादौ निबध्नन् काव्यमुपक्रमते ॥ 12

**व्यूढोरस्को वृषस्कन्धः सालप्रांशुर्महाभुजः ।**
**आत्मकर्मक्षमं देहं क्षात्रो धर्म इवाश्रितः ॥ १३ ॥**

व्यूढं व्यायामशिक्षया विभक्तं उरः यस्य सः । वृषस्य महोक्षस्य स्कन्ध इव स्कन्धो यस्य सः । सालवृक्ष इव प्रांशुः उन्नतः । महान्तौ दीर्घौ

आजानुलम्बिनौ बृहन्तौ च भुजौ यस्य सः। अत एव आत्मनः क्षात्र-धर्मरूपस्य स्वस्य यत् कर्म प्रजानां विनयाधानरक्षणभरणरूपं तस्मिन् क्षमं समर्थं देहं आश्रितः परिगृहीतवान् क्षात्रः क्षत्रियसम्बन्धी धर्म इव स्थितः दिलीप इति राजेन्दुः इति पूर्वेणान्वयः।

पूर्वस्मिन् श्लोके जन्म नाम चोक्तम्। अत्र आकारवर्णनं कृतम्।

उन्नतस्य पुरुषस्य पुरतः स्थित्वा तं यदि वयमवलोकयामः तर्हि ऋजुप्रसरा अस्माकं दृष्टिः प्रथमं तस्य उरसि पतति। ततःपरं ऊर्ध्वं प्रसरन्ती कण्ठं शिरश्च पश्यति। ततः अवरोहन्ती पादपर्यन्तं गोचरयति। इमं लोकानुभवमनुसृत्य कविः महाराजं दिलीपं प्रतिभानेनास्य पुरस्तात् स्थापयित्वा एवं तस्य रूपं वर्णयतीति सहृदयैर्विभावनीयम्॥ 13

# ॥ वसुमान्-12 ॥

सुदर्शनः स्वधनस्यैव बहुनो व्ययेन महता समारोहेण कमलालयां पर्यणयत्। वसुमता वितीर्णं यौतकमपि न स्वीचकार। विवाहमङ्गलार्थमिति कमलालयायै तेन क्रीत्वा दत्तं पट्टचेलमात्रं तया प्रतिगृह्यमाणमन्त्रमन्यत।

पतिगृहं गता कमलालया अचिरादेव तत्र गुणवतीति प्रथामवाप। कतिपयान् मासान् ललितायाः सहवासः तथा तां परिणतां चकार। भर्तुः तद्बन्धूनां गुरूणां कर्मकराणां अन्येषां च यथा मनःकालुष्यं मनागपि न भवेत् प्रत्युत प्रीतिर्भवेत् तथा तेषु वृत्तिमकरोत्। अतिव्ययवर्जने आवश्यकस्य व्ययस्य निश्शङ्कं करणे च जागरूका सती कुटुम्बनिर्वाहनिपुणेति सर्वबहुमता बभूव।

तस्यां जातविश्वासः अत्यन्तमनुरक्तश्च सुदर्शनः धनादिपेटिकाकुञ्चिकागुच्छं दत्वा आयव्ययव्यवहारं कृत्स्नं तस्यामेव विन्यस्य स्वयं सुखवासी समवर्तत। एवमपि दर्परहिता सा अनिच्छतेऽपि तस्मै निवेद्यैव सर्वं कार्यं चकार। अनिवेदितं न किञ्चित्।

तदा तदा पत्या सह पितृगृहं गत्वा पितरं मातरं च प्रणम्य स्वसौभाग्येन तोषयित्वा प्रत्याजगाम। कदाचित् तां सुदर्शनोऽवोचत्— "यदि तव पितृगृहे किञ्चिदपेक्षितं भवति तत् त्वं सद्यः क्रीत्वा देहि। अहं किमपि ब्रूयामिति शङ्कां मा स्म कृथाः। पिता ते वृद्धः रुग्णश्च। यदि भेषजं किमपि क्रेयं, अथवा फलानि कानिचित् वाञ्छति अविलम्बितं तानि आनाय्य प्रतिपादय। स्वादूनि अनुकूलानि च भक्ष्याणि पक्त्वा वितर। यदि मे श्वश्रूः चेलकाङ्क्षिणी, तामपेक्षां सद्यः पूरय। वृद्धानामाराधनं अस्माकं सर्वश्रेयस्करम्। श्वशुरगृहात् तत्तदर्थग्रहणमात्रं जामातुः कर्म, न तु कस्यापि वस्तुनः अर्पणं इति ये मन्यन्ते तेषां वर्गे नाहमन्तर्गतः। यन्मे धनं क्षेत्रमन्यद्वा, यावच्च, तस्य सर्वस्य त्वं प्रभवसि" इति।

अनेन पत्युः गुणातिशयप्रकाशकेन दीर्घेण भाषितेन सुप्रीता कमलालया तस्मै निवेद्य तदा तदा उचितमुपचारं पतिबन्धूनामिव स्वमातापित्रोरपि कुर्वती आस्त।

वसुमत आचरणैः कण्ठोक्तिभिश्च सुशिक्षितः शङ्खधरोऽपि नवीभूत इव मातरि पितरि च अत्यन्तं विनीततां विधेयतां च अवललम्बे। तयोर्हृदयं आनन्दभरितमकरोत्।

मासि मासि लब्धं वेतनं पित्रे निवेद्य तदनुमत्या मात्रे अदात्। गृहे अपेक्षितानि वस्तूनि स्वयमापणं गत्वा क्रीत्वा

आनिनाय । पितुः स्नानाद्यवसरे सह स्थित्वा उत्थापनं, उपवेशनं, अङ्गोद्वर्तनं, सुखोष्णजलसेचनं, शुष्कखण्डवस्त्रेण अङ्गमार्जनं, धौत-वस्त्रधारणं, सन्ध्यावन्दनादिहेतोः शुद्धजलपात्रसम्भरणं इत्यादि सर्वं कृत्वा भक्त्या श्रद्धया च तं शुश्रूषते स्म ।

गृहकृत्येषु मातुः श्रमो मा भूदिति तस्या अपि कर्मसु स्वयं भागी बभूव । क्लृप्तं कालमनतिक्रम्य आपणं गत्वा तत्र वसुमान् यथा सुप्रीतो भवेत् तथा सर्वं सावधानं त्वरितं निपुणं च कृत्वा तदनुमत्या गृहं प्रति निवर्तमानः मातापितृभ्यां रुचितानि फलानि क्रीत्वा आनीय समर्पयामास ।

मणिबाहोर्नलिन्याश्च सम्प्रति असम्पूर्णा आशा एकाऽपि मनसि नासीत् । उभावपि पूर्णकाममात्मानं अमन्येताम् । नलिनी सर्वदैव वसुमति कृतज्ञा । मणिबाहुरपि उत्तमकुटुम्बिनीपदं गतां सौभाग्यसम्पन्नां पुत्रीं कुटुम्बभारभरणक्षमं विनीतं विधेयं पुत्रं च दृष्ट्वा प्रहृष्यन् वसुमतः पाराङ्मुख्ये स्वकुटुम्बस्य सुस्थितिरियं सर्वथा दुर्लभेति तत्त्वं बुध्यमानः तं प्रति स्वस्य स्थितां असूयां अत्यन्तं विजहौ । तां प्रति अनुतापं भेजे । कृतघ्नोऽभूवमिति विव्यथे । सर्वेश्वर एव साक्षात् वसुमद्रूपेण आविर्भूतः पूर्वं वराह-रूपेण अधोगतां भुवमिव स्वकुटुम्बं उद्धधारेति मेने । पूर्वं स्वकृत-मसत्कारं अत्यन्तं विस्मृत्य एवं महोपकारपरम्परां कुर्वतस्तस्य गुणान् स्मारं स्मारं "निस्समो महापुरुषः सः" इति कृतज्ञतापरवशेन मनसा पुनः पुनः शश्लाघे ।

क्रमेण तस्य वसुमति बहुमानः प्रेम च ववृधाते। कस्मिंश्चिद् दिने पुत्रं प्रेष्य तमानाय्य पुरत उपवेश्य एवं उवाच– "आयुष्मन्, अहं पापिष्ठः । मत्तः दृप्तश्च आसम् । चक्षुष्मतोऽपि मे वस्तुतः आन्ध्यमभवत् । तेन त्वयि दीप्यमानानि अनर्घाणि गुणरत्नानि

द्रष्टुं मे शक्तिर्नासीत् । हा धिक् तां मे दुरात्मतां यया परुषा वाचो विसृज्य त्वां एकवस्त्रं गृहात् निरकासयम् । घोरं तन्मदीयं दुश्चरितं अत्यन्तं विस्मृत्य यदेवं पाताले पतितान् अस्मान् उद्धृत्य सुखैकमये स्वर्गे स्थापितवानसि ; तेन सुव्यक्तां उत्तमपुरुषतां ते कया वाचा वर्णयेयं, कया वाचा प्रशंसेयम् । हृदयगाम्भीर्यं ते चिन्तयतो मे मूकता वरं भाति । तव गुणैरेव त्वं मदीयां आसुरीं प्रकृतिमुन्मूलितवानसि ।

आयुष्मन्, सर्वान् मे अपराधान् क्षमस्व । वयसा बन्धु-भावेन च त्वं मे अवरोऽसि । अन्यथा पादयोस्ते पतित्वा क्षमां याचेयम् । अथवा प्रागेव सर्वं मे दुर्वृत्तं स्वकीयं जन्मान्तरवृत्तं मनुष्या इव अत्यन्तं विस्मृतवतस्ते इतःपरं क्षन्तव्यं किमस्ति ?

वसुमन्, प्रियतम भागिनेय, एहि, गाढं त्वामाश्लिष्यामि । लोकोत्तरस्य सुजनस्य ते देहसम्पर्केण इदं मे पापिष्ठं शरीरं परिपूतं भवतु”...............

वृद्धस्य, गुरुपदे स्थितस्य मातुलस्य मुखात् निर्गच्छन्तीः इमाः वाचः श्रुत्वा लज्जितः वसुमान् तस्य वचनावसानं चिकीर्षन् “प्रिय मातुल, अस्थाने भवान् आत्मानं निन्दति, मां च अति-प्रशंसति। अपकाराणां उपकाराणां च बहूनि रूपाणि भवन्ति । यन्मे अत्रभवता कृतं न सः अपकारः । अपि तु परम उपकारः । कथ-मन्यथा इयं स्थितिर्मम अत्रभवतश्च सम्पन्ना अभविष्यत् । सर्व-मीश्वरेच्छया भवति । तदार्यः यत् किमपि प्रति न शोचितु-मर्हति ” इति विज्ञापयामास । “वत्स यद्यत् त्वं करोषि, यद्यत् भाषसे, तेन तेन विद्रुतं मे हृदयं पुनर्विद्रावयसि” इत्युक्तवन्तं तं मातुलानीं च प्रणम्य अनुज्ञाप्य गृहं ययौ ।

# पुस्तकपरामर्शः

उभयरूपकम् । प्रहसनम् । कविसार्वभौम कविशेखर श्री महालिङ्गशास्त्रिविरचितम् । "साहित्यचन्द्रशाला । तिरुवालङ्गाडु पोस्ट्, तञ्जावूर् जिल्ला ।" मूल्यं त्रीणि रूप्याणि ।

रस्यवाचः कवयः पूर्वमपि विरलाः । सुतरामिदानीम् । ये कतिपये सन्ति तेषु उत्तमकक्ष्यां गतः श्री. य. महालिङ्गशास्त्री तथा प्रसिद्धः यथा तं प्रति यत्किमप्यभिधीयमानं ज्ञातज्ञापनापरपर्यायपुनरुक्तदोषास्पदतां नातिपतेत् । गद्यपद्यमिश्ररूपाणि बहूनि प्रसन्नमधुरगम्भीराणि काव्यानि कृत्वा प्रकाश्य लब्धयशसोऽस्य कवितल्लजस्य अपरमिदं अद्य प्रकाश्यमानं उभयरूपकं नाम प्रहसनं प्रकाशितपूर्वतदीयकाव्यान्तरवदेव अलं सहृदयहृदयाराधनाय ।

शास्त्रानुशिष्टचिरन्तनजीवनपद्धतिश्रद्धाशालिनि कुले जातस्य कस्यचिद् गृहस्थस्य द्वौ पुत्रौ । तयोर्ज्यायान् कृतोद्वाहः कुटुम्बकार्यकरणसक्तः भार्यया सह गृह एव वसति । कनीयान् छागलः पुनः आधुनिकपद्धत्या विद्याधिगमाय मद्रपुर्यां वसन् विरामावसरेषु नगरान्तरस्थं मातुलगृहमेव गच्छंश्च वेषभाषाव्यवहारेषु नवीनप्रक्रियानुसरणाभिनिविष्टः सर्वथा विपर्यस्तो बभूव । ग्रामाज्जुगुप्समानः मातापितृदर्शनार्थमपि तत्र आगमनं परिजहार । कदाचित् पित्रा कृतं सनिर्बन्धमाह्वानमनुरुध्य ग्राममागतः कतिपयाभिर्नाडीभिरेव जातपरमोद्वेगः मात्रा दत्तं पानं ओष्ठचुम्बं पीत्वा स्वयं कृतमुखक्षौरः अस्नातः अभुक्तः यं कञ्चिदनापृच्छ्य अनिवेद्य अनन्यविदितं धूमशकटस्थानं गत्वा कर्मकरद्वारा पित्रे कञ्चन लेखं विसृज्य मद्रं गतो भवति । एतल्लेखवाहकस्य कर्मकरस्यागमनात्पूर्वं गृहे तमनुपलभ्य तदन्वेषणसम्भ्रमवन्तः तन्मातृप्रभृतयः तेन परित्यक्तं पत्रं किञ्चित् दुरनुवाच्य पोट्टलस्थं च किमपि वस्तु भ्रमादन्यथा गृहीत्वा विषमुपभुज्य मृतः स इति बुद्धिं कृत्वा परिभ्रान्ता भवन्ति । सुधियः कस्यचित् परामर्शेन क्रमेण शिथिलीभवन्त्यां तस्यां बुद्धौ कर्मकरानीतेन लेखेन तत्त्वं सुज्ञातं भवति । नवीनपद्धत्या विद्यामधीत्य उत्तमपरीक्षामुत्तीर्य उन्नतं राज्याधिकारिपदमास्थाय विभ्राजमानः सन् आत्मनः महते गौरवाय भविष्यति कनीयान् पुत्रः छागलः इति महतो मनोरथान् कुर्वन् स्थितः अत एव ज्यायसि पुत्रे भार्यया सह अवज्ञां कुर्वन् पिता लेखमुखेन कनीयसा दर्शितामवमतिं, स्वाभिमतां कन्यां विहाय स्वयमेव काञ्चित्

परिणेतुं तेन कृतं दृढं सङ्कल्पं च जानन्, भग्नाशो भवति । गलितसर्वव्यामोहश्च । इदमत्रत्यं कथावस्तु ।

तदिदं महाकविरयं यथाशीलं सौन्दर्यशालिपदपदार्थरचनया सरसतामापाद्य इदं रूपकं रचितवान् । क्षुरकर्मपतिते रोमपटले विषत्वविभ्रमः, स्मरणसौकर्याय छागलेन पत्रारोपिते तदीयायां कलाशालायामभिनेष्यमाणनाटककथाभागे तदीयचरमवाचिकत्वागाही मिथ्याप्रत्ययश्च अस्याः कृतेः प्रहसनात्मकरूपकभेदत्वापादकेष्वंशेषु प्राधान्यं भजतः ।

स्वमातापितरावन्तर्भाव्य ग्रामवासिभिरनुस्त्रियमाणाया जीवनपद्धतेः आत्मना सुदृढावलम्बिताया नवीननागरिकतयाश्च अत्यन्तदुश्लिष्टतां छागलः आग्रहेण प्रतिपादयति । एवं मिथो विरुद्धे द्वे जीवनपद्धती विषयीकृत्य प्रवृत्तं रूपकं उभयरूपकाभिधानं लभत इति प्रतीमः । "मञ्जुला न रूपकनायिका अपि तु रूपिणी नायिका" (पु. 38) इत्येतद्दर्शने नायिकारूपकनायिका अपि तु रूपिणी नायिका" (पु. 38) इत्येतद्दर्शने नायिकाद्वयप्रसङ्गवत्त्वमेतदभिधाननिमित्तं स्यादिति भाति । पितृदम्पत्योरुभयोर्विवेकसम्पत्तिप्रतिपादकत्वं च ।

काव्यसामान्यं पर्यन्ततः उपदेशपरम् । अनेवम्भूतं यत्किमपि काव्यं न सतामादरणीयं भवति । अतः प्रहसनकारैरपि तल्लक्ष्यमविस्मृत्य सर्वदा बुद्धौ धार्यम् । सम्यग्धारयति च प्रकृतः कविः श्रीमान् शास्त्री । प्रख्याते महति श्रोत्रियकुले लब्धजन्मा अयं तदनुगुणं धीचितं बहुधा लिखति । प्राचीननवीनकालस्थित्योर्बहवो विशेषाः सुवचाः । तेषु सर्वप्रधानं अत्यन्तसारभूतमेकं वज्रघोषोपाध्यायमुखेन (पु. 4) उपन्यस्यन् कविः आत्मनः सूक्ष्मग्राहितां सम्यक् प्रकाशयति— "अहो स्नेहशोषणः कालमहस ऊष्मा" इति । पतिः पत्नी, पिता पुत्रः, अग्रजः अनुजः, श्वश्रूः स्नुषा, गुरुः शिष्यः, स्वामी कर्मकरः इति बहुधा तावत् मनुष्याणां पारस्परिकः सम्बन्धो भवति । तत्र सर्वत्र परस्परस्नेहसमृद्धिर्यथा सम्पन्ना स्यात् तथा सुशोभना काचन स्थितिः पूर्वमासीत् । अद्य तु साक्षाद्विपरीता । लोकक्षेमसम्पादनप्रवणैः सर्वैः अयमंशोऽत्यन्तमवधेयः । बाह्येषु सुखसाधनेषु सर्वेषु सिद्धेष्वपि यावज्जनानां मिथोऽनुरागरूपमान्तरं सुखसाधनं न सम्पद्यते तावत् सुखजीवनं केवलमाशामोदकमात्रम् । प्राचीना जीवनपद्धतिः एतदनुकूला । अद्यतनी तु न केवलं नानुकूला अपि तु परिपन्थिनीति तत्त्वमिदं सर्वे अवधारयितुमर्हन्ति ।

महाकवित्वोचितां सर्वां सम्भावनां सर्वां सम्पदं च लभतामयं अभिजनविद्यावृत्तसम्पन्नः शास्त्रीत्याशास्महे ।

ஆத்மஸாக்ஷாத்காரத்திற்கு வேண்டியதான மனநிலை பெற்றவர்கள் சரீரத்திற்குள்ளிருக்கும் ஜீவாத்மாவை மனதினாலே ஸாக்ஷாத்காரம் செய்கிறார்கள். அவ்வளவு முதிர்ந்த நிலை பெறாதவர்கள் ஜ்ஞாநயோகம் செய்து அதனால் யோகமென்கிற முன் கூறிய மனநிலையை ஸம்பாதித்து ஆத்மஸாக்ஷாத்காரம் செய்கிறார்கள். ஜ்ஞாநயோகத்திற்கும் தகுதியில்லாதவர்களும் தகுதியிருந்தும் ஸுலபமான வழியை நாடுமவர்களும் உலகிற்கு அனுஷ்டான வழிகாட்டிகளான வ்யபதிஷ்டர்களும் கர்மயோகத்தைக்கொண்டே வேண்டிய மனநிலையை ஸம்பாதித்து ஆத்மஸாக்ஷாத்காரம் செய்கிறார்கள்.

१३ अन्ये त्वेवमजानन्तः श्रुत्वाऽन्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्युं श्रुतिपरायणाः ॥ २५ ॥

अनिष्पन्नकर्मयोगानां मुमुक्षूणां कर्मयोगोपक्रमदशोच्यते– 'तु' शब्देन 'अजानन्तः' इत्यनेन च कर्मयोगादिष्वनधिकृतत्वं द्योतितम् । एवम्– उक्तप्रकारेण अजानन्तः ज्ञानरहिताः, अन्ये तु– कर्मयोगादिष्वनधिकृताः पुनः, अन्येभ्यः तत्त्वदर्शिभ्यः, श्रुत्वा–कर्मयोगादिस्वरूपमाकर्ण्य उपासते– कर्मयोगादिभिः आत्मानं चिन्तयन्ति, किं च ये श्रुतिपरायणाः श्रुतिः परं अयनं– निष्ठा, येषां ते श्रुतिपरायणाः– श्रुत्वोपासीनेभ्यो भिन्नाः श्रवणमात्रनिष्ठाः अधिकारिणः तेऽपि मृत्युं– संसारं. अतितरन्त्येव– क्रमेण कर्मयोगाद्यनुष्ठानमुखेन संसारमतिक्रामन्त्येव । 'अपि'शब्देनान्येषां कैमुत्यं एषामपकृष्टपर्वनिष्ठत्वं च सूचितम् ।

கர்மயோகாநுஷ்டானத்திற்கு வேண்டிய ஜ்ஞாநசக்தியில்லாதவர்களும் தத்த்வஜ்ஞாநம் பெற்ற அதிகாரிகளிடமிருந்து கர்மயோகம் முதலியவற்றைக் கேட்டு அறிந்து ஆத்மாவை உபாஸிக்கிறார்கள். அப்படி உபாஸிக்க சக்தியில்லாதவர்களும் பெரியோர்கள் பக்கல் கேட்டு காலக்ரமத்தில் கர்மயோகாதிகளால் ஆத்மஸாக்ஷாத்காரம் பெற்று ஸம்ஸாரத்தைக் கடக்கின்றார்கள்.

५१४ यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात्तद्विद्धि भरतर्षभ ॥ २६ ॥

'अथ प्रकृतिसंसृष्टस्यात्मनो विवेकानुसन्धानप्रकारं वक्तुं सर्वं स्थावरं जङ्गमं च सत्त्वं चिदचित्संसर्गजमित्याह' — हे भरतर्षभ! स्थावरजङ्गमं- स्थावरं जङ्गमं च, सत्त्वं- जन्तुः, किञ्चित्- किमपि, यावत्- सकलमपि, क्षेत्रक्षेत्रज्ञसंयोगात्- देहात्मनोरितरेतरसंयोगादेव सञ्जायते- समुत्पद्यते, (इति) तत्- जन्म, विद्धि- जानीहि ।

அர்ஜுனா! சரீரத்திற்காட்டில் ஆத்மா வேறுபட்டதாக எளிதில் நமக்குப் புலப்படுவதில்லை. ஏனெனில் உலகில் உண்டாகும் அசையும் பொருளும், அசையாப் பொருளுமாகிய எல்லா ஜந்துக்களும், சரீரத்திற்கும் ஜீவாத்மாவிற்கும் ஒன்றுக்கொன்று சேர்க்கையினாலேயே உண்டாகின்றன என்று அறிவாயாக. ஆதலால் உடலுமுயிரும் தனிப்பட்டவை என்கிற தெளிவு ஏற்படும் என்றவாறு.

५१५ समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।
विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥ २७ ॥

अथ समत्वविषमत्वादिभिर्देहात्मनोर्विवेकानुसन्धानं परमपुरुषार्थहेतुतया प्रशंसति — यः- अधिकारी विनश्यत्सु- नाशान्तषड्भावविकारवत्सु, सर्वेषु- भूतेषु- समस्तेषु देवादिदेहेषु, समं- ज्ञातृत्वादिना एकरूपं, परमेश्वरं- तिष्ठन्तं- देहेन्द्रियादिकं प्रति नियन्तृत्वेन वर्तमानं, अविनश्यन्तं- नाशरहितं (षड्भावविकाररहितं) आत्मानं पश्यति- जानीते, सः, पश्यति- यथावस्थितात्मज्ञानवान् । समत्वविषमत्वनियन्तृत्वनियाम्यत्वनित्यत्वानित्यत्वैः आत्मशरीरयोर्विवेकानुसन्धानमेव यथावद्दर्शनम् ।

தேவன் மநுஷ்யன் என்றாற்போலுள்ள தேஹங்களுக்குப் பிறப்பு அழிவு முதலியனவுண்டு. ஆத்மாவிற்கு இவையில்லை. ஆத்மா ஒரே மாதிரியான ஸ்வபாவமுடையவன். இவைகளுக்கு அவன் நியமனம் செய்கின்றவன். இவை அவனால்

நியமிக்கப்படுமவை. இந்த அறிவுதான் உண்மையான தேஹாத்மவிவேகம் என்பது.

५१६ समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।
न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥ २८ ॥

प्रस्तुतमेव समदर्शनमत्रापि फलद्वारा स्तूयते– हि– यस्मात् कारणात् सर्वत्र– देवादिशरीरेषु, समवस्थितं– सम्यक्– शेषित्वेन आधारत्वेन नियन्तृत्वेन च, अवस्थितं– वर्तमानं "सर्वत्रावस्थितो देहे" इति वक्ष्यमाणतया "भर्ता भोक्ता महेश्वरः" इति पूर्वोक्ततया च 'सर्वत्र समवस्थितं' इति शब्दयोरयमेवार्थः । ईश्वरं– स्वस्वदेहेन्द्रियादिकं प्रति ईश्वरं स्वात्मानं समं– ज्ञानैकाकारतया सदृशं, पश्यन्– उपलभमानः आत्मना– मनसा, आत्मानं– स्वमात्मानं, न हिनस्ति– हिंसां न करोति– रक्षतीति यावत् । ततः– तस्मात्, ज्ञातृतया सर्वत्र समानाकारदर्शनात्, परां गतिं गम्यत इति गतिः– परं प्राप्यं यथावस्थितं स्वात्मानं याति– प्राप्नोति ।

தேவாதிசரீரங்களில் அவற்றுக்குச் சேஷியாய் தாரகனாய் நியமிக்குமவனாயிருப்பவன் இஜ்ஜீவன். எல்லா ஜீவனும் ஜ்ஞாந ஸ்வரூபன். இந்த ஸமதர்சநத்தினால் ஸம்ஸாரத்தில் நின்றும் விடுபட்டு பரிசுத்தாத்மஸ்வரூபப்ராப்தி ஏற்படுகிறது. ஸம்ஸார நிவ்ருத்தியும் மோக்ஷப்ராப்தியும் ஸமதர்சனத்திற்குப் பலம்.

५१७ प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथात्मानमकर्तारं स पश्यति ॥ २९ ॥

प्रस्तुतपूर्वश्लोकद्वयेन प्रकृतिपुरुषयोः समत्वविषमत्वशेषित्वशेषत्वादिभिः वैधर्म्यमुक्तम् । अथ साक्षात्क्रियाश्रयत्वतदभावादिभिस्तयोर्वैधर्म्यमुच्यते— यः सर्वशः– सर्वाणि, कर्माणि– आकुञ्चनप्रसारणादीनि प्रकृत्यैव त्रिगुणात्मिकया माययैव, क्रियमाणानि– निर्वर्त्यमानानि, पश्यति उपलभते, तथा– तद्वत्, आत्मानं शुद्धस्वरूपं, अकर्तारं च– सांसारिककर्मसु निरुपाधिककर्तृत्वरहितं च, पश्यति– उपलभते, सः– उक्ताधिकारी, पश्यति– यथावस्थितात्मदर्शनवान् भवति ।

KENDRIYA SANSKRIT VIDYAPEETHA, TIRUPATI
1000
२४०



நீட்டுதல் முடக்குதல் முதலிய சரீரக்ரியைகள் யாவற்றிற்கும் காரணம் அசேதனமாகிய ப்ரக்ருதியேயன்றி சுத்தமான ஆத்மாவன்று. ஆத்மாவிற்கு ப்ரக்ருதி ஸம்பந்தம் முதலியவை கர்மாவினாலேற்பட்டவைகளே என்று தெளிந்தவன் உண்மை ஆத்மஸ்வரூபத்தை அறிந்தவனாகிறான்.

५१८ यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥ ३० ॥

अथ प्रकृतिपुरुषयोरेव परिणामित्वापरिणामित्वलक्षणं वैषम्यमुच्यते— यदा यस्मिन् काले, भूतपृथग्भावं— भूतानां प्रकृतिसंसृष्टचेतनानां, पृथग्भावं—देवत्वमनुष्यत्वादिजात्या, ह्रस्वत्वदीर्घत्वादिगुणेन च पृथक्त्वं, एकस्थं— एकस्मिन् तिष्ठतीति एकस्थं प्रकृतिपुरुषयोरन्यतरस्मिन् प्रकृतितत्त्वे स्थितं, अनुपश्यति— शास्त्राचार्योपदेशानुसारेण पश्चात् उपलभते, तत एव— प्रकृतित एव विस्तारं च उत्तरोत्तरपुत्रपौत्रादिभेदविकासं च, पश्यति, तदा, ब्रह्म— अनवच्छिन्नं ज्ञानैकाकारमात्मानं, सम्पद्यते— सम्प्राप्नोति ।

சேதநமும் அசேதநமுமாகிய இப்பிரபஞ்சத்தில் தேவன் மநுஷ்யன் என்றாற்போல் ஜாதி வேற்றுமையும், நீண்டும் குறுகியும் நிற்கையாகிற குணவேற்றுமையும் இவை போன்ற பேதங்களனைத்தும் அசேதநமாகிய ப்ரக்ருதியைச் சேர்ந்ததேயன்றி ஆத்மாவிற்கு இவ்வேற்றுமையில்லை என்றும் புத்ரபௌத்ராதி பரம்பரைகளும் ப்ரக்ருதிபரிணாமங்களே என்றும், எப்பொழுது தெளிகின்றானோ அப்பொழுது ப்ரஹ்மத்தை அடைகின்றான்.

५१९ अनादित्वान्निर्गुणत्वात्परमात्माऽयमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥ ३१ ॥

आत्मनो नित्यत्वापरिणामित्वादिभिरुक्तं प्रकृतिवैधर्म्यं सहेतुकं स्थिरीकरोति । कौन्तेय ! अयं परमात्मा— देहेन्द्रियादिनियन्ता जीवः,